This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रीगुरुभ्यो नमः वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन् पुमर्थांश्चतुरो देयाद्विद्यातीर्थमहेश्वरः १ नत्वा श्रीभारतीतीर्थविद्यारण्यमुनीश्वरौ क्रियते तृप्तिदीपस्य व्याख्यानं गुर्वनुग्रहात् २ तृप्तिदीपाख्यं प्रकरणमारभमाण श्रीभारतीतीर्थगुरुस्तस्य श्रुतिव्याख्यानरूपत्वात् व्याख्येयां श्रुतिमादौ पठति आत्मानं चेदिति १

आत्मानं चेद्विजानीयादयमस्मीति पूरुषः किमिच्छन्कस्य कामाय शरीरमनुसंज्वरेत् १

अस्याः श्रुतेरभिप्रायः सम्यगत्र विचार्यते जीवन्मुक्तस्य यातृप्तिः सा तेन विशदायते २

इदानीं चिकीर्षितग्रंथविचारं तत्फलं च दर्शयति अस्या इति अत्र तृप्तिदीपाख्ये ग्रंथे अस्या आत्मानं चे। द्विजानीयादित्यादिकायाः श्रुतेरभिप्रायस्तात्पर्यं सम्यग्विचार्यते तेनाभिप्रायविचारेण जीवन्मुक्तस्य श्रु। १
तिप्रसिद्धा यातृप्तिः सा विशदायते स्पष्टा भवति २

Checked 2012

KKSU LIBRARY
RAMTEK
441 106
M-1431
Dist. Nagpur

Acc. No. ~~1323.~~ M1431
Title - तृप्तिदीप. (from पंचदशी.) (संपूर्ण)
Author - विद्यारण्य.
Date - ?
Sub - Vedanta.
folio - 85
Xerox - 169

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पदछेदः पदार्थोक्तिर्विग्रहो वाक्ययोजना आक्षेपस्य समाधानं व्याख्यानं पंचलक्षणमिति व्याख्यानलक्षणस्यो
क्तत्वात्सुरुष इति पदस्यार्थमभिधातुं तदुपोद्घातत्वेन सृष्टिं संक्षिप्य दर्शयति मायाभासेनेत्यादि प्रतिपाद्य
मर्थं बुद्धौ संगृह्य तदर्थमर्थांतरवर्णनमुपोद्घातः अत्र मायाशब्देन चिदानंदमयब्रह्मप्रतिबिंबसमन्विता॥
सत्वरजस्तमोगुणात्मिका जगदुपादानभूता प्रकृतिरुच्यते सा च सत्वगुणस्य शुद्ध्यविशुद्धिभ्यां द्विधा विद्यमा

मायाभासेन जीवेशौ करोतीति श्रुतत्वतः कल्पितावेव जीवेशौ ताभ्यां सर्वं प्रकल्पितं ३ ॥ नाक्रमेण मा

या चाविद्या च भवति तयोर्मायाविद्ययोः प्रतिबिंबितं ब्रह्मचैतन्यमेवेश्वरो जीवश्चेत्युच्यते तदिदं तत्वविवेकाख्येप्रं
थेश्रीमद्विद्यारण्यगुरुभिर्निरूपितं चिदानंदमयब्रह्मप्रतिबिंबसमन्विता तमोरजःसत्वगुणा प्रकृतिर्द्विविधा च
सा सत्वशुद्ध्यविशुद्धिभ्यां मायाविद्ये चतेमते मायाबिंबो वशीकृत्य तां स्यात्सर्वज्ञईश्वरः अविद्यावशगस्त्वन्यस्त

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

न सिद्धाप० चित्र्यादनेकधा सा कारणशरीरं स्यादिति ३ इममेवार्थं मनसि निधाय जीवेशावाभासेन करोति माया चाविद्या

२ च स्वयमेव भवतीति श्रुतिमवलम्ब्य तो जीवेश्वरयोर्मायाकल्पितत्वमभ्यस्त्य तत्रं जगत्ताभ्यामेव प्रकल्पितं तत्र

केन कियत्कल्पितमित्यत आह ईक्षणादीति तदैक्षत बहु स्यां प्रजायेयेति श्रुतमीक्षणमादिर्यस्याः

ईक्षणादिप्रवेशान्ता सृष्टिरीशेन कल्पिता जाग्रदादिविमोक्षान्तः संसारो जीवकल्पितः ४

सेक्षणादिः अनेन जीवेनात्मनानुप्रविश्येति श्रुतेः प्रवेशान्तो यस्याः सा प्रवेशान्ता ईक्षणादिश्चासौ प्रवेशान्ता २

चेति पश्चात्कर्मधारयः सेयं सृष्टिरीश्वरेण कल्पिता जाग्रदादिर्यस्य संसा ॥ श्रीरामाय नमः ॥ श्री ॥

3

रस्यासौ जाग्रदादिः विमोक्षो मुक्तिरंतो यस्यस विमोक्षांतः संसारो जीवेन कल्पितः तदभिमानत्वाज्जीवस्येसर्थः तेच
जाग्रदादयः इत्थं श्रूयंते सएव मायापरिमोहितात्मा शरीरमास्थाय करोति सर्वं स्त्र्यन्नपानादिविचित्रभोगैः सए
व जाग्रत्सरितृप्तिमेति स्वप्ने सजीवः सुखदुःखभोक्ता स्वमायया कल्पितविश्वलोके सुषुप्तिकाले सकले विलीने
तमोभिभूतः सुखरूपमेति पुनश्च जन्मांतरकर्मयोगात्सएव जीवः स्वपिति प्रबुद्धः पुरत्रये क्रीडति यश्च जीव

श्चमाधिष्ठानभूतात्माकूटस्थासंगचिद्वपुः॥

॥स्तत्तस्मज्जातं सकलं विचित्रं जाग्रत्स्वप्नसु
षुप्त्यादिप्रपंचं यत्प्रकाशते तद्ब्रह्माहमिति ज्ञात्वा सर्वबंधैः प्रमुच्यतेइति ४ एवं पुरुषशब्दार्थविबोधोपयोगि
नीं सृष्टिमभिधायइदानीं पुरुषशब्दार्थमाह श्चमाधिष्ठानेति यः कूटस्थासंगचिद्वपुरविकार्यसंगचित्स्वरूपः
श्चमाधिष्ठानभूतात्मा अस्पदेहेंद्रियाद्यध्यासस्य अधिष्ठानभूतोधिष्ठानत्वेन वर्त्तमानः पर॥ श्रीरामचंद्राय स्म

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

न०सिद्दी०पृ० मात्मास्ति सोऽसंगएवान्योन्याध्यासतः अन्योन्यस्मिन् अन्योन्यात्मकतां अन्योन्यधर्मांश्चाध्यस्येत्याचार्यैर्निरू
३ पितेन तादात्म्याध्यासेन असंगधीस्थजीवः स्वेन पारमार्थिकसंवंधशून्यायां बुद्धौ वर्तमानो जीवः सन् अ
त्र असंगाश्रितो पुरुष इत्युच्यते सवा अयं पुरुषः सर्वासु पूर्षु पुरिशय इति श्रुत्या पुरुषशब्दस्य व्युत्पादित

अन्योन्याध्यासनोसंगधीस्थजीवोत्रपूरुषः ५

त्वात् पुरुषस्यैव च पुरुषत्वात् पुरुष एव पूरुषः बुध्यादिकल्पनाधिष्ठानकूटस्थचैतन्यमेव बुद्धौ प्रतिबिंबि ३
तत्वेन प्राप्तजीवभावं सत् पुरुषशब्देनोच्यत इति अभिप्रायः ५ ॥श्रीरामायनमः॥ ॥श्री॥ ॥

5

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नन्वत्र पुरुषशब्देन केवलचिदाभासरूपो जीवस्तस्यो अतो किमनेन कूटस्थचैतन्येनाधिष्ठानभूतेन तस्याशंक्यास त
समोक्षाप्रच्यवितत्वसिद्धेर्यतदपि स्वीकर्तव्यमित्याह साधिष्ठान इति साधिष्ठानः अधिष्ठानेन कूटस्थचैत

साधिष्ठानो विमोक्षादौ जीवोऽधिक्रियते न तु केवलो निरधिष्ठानविभ्रान्तेः क्वाप्यसिद्धितः ॥

चैतन्येन सहितो जीवो विमोक्षादौ विमोक्षस्वर्गादिसाधनानुष्ठानेऽधिक्रियतेऽधिकारी भवति न तु केवलचिदाभा
सः कुत इत्यत आह निराधिष्ठानेति अधिष्ठानरहितस्यारोप्यस्य लोकेऽदृष्टत्वादिति भावः ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तृप्तिदीप० इदानींसाधिष्टानस्यैवतस्यसंसाराद्यपचयितत्वंश्लोकद्वयेनविभज्यदर्शयति अधिष्टानांशसंयुक्तमिति जी
४ वोयदाअधिष्टानांशसंयुक्तंकूटस्थसहितंभ्रमांशंचिदाभासोपेतंशरीरद्वयमवलंवते स्वस्वरूपत्वेनस्वीक
रोति तदाहंसंसारीत्येवंजीवोभिमन्यते ७ भ्रमांशस्येति यदापुनर्भ्रमांशस्यदेहद्वयसहितस्यचिदाभा

अधिष्टानांशसंयुक्तंभ्रमांशमवलंवते यदातदाहंसंसारीत्येवंजीवोभिमन्यते ७ भ्रमांश
स्यतिरस्कारादधिष्टानप्रधानता यदातदाचिदात्माहमसंगोस्मीतिवुध्यते ८ ॥ श्रीराम

सस्यतिरस्कारान्मिथ्यात्वज्ञानेनानादरणादधिष्टानप्रधानताऽधिष्टानभूतस्यैवकूटस्थस्यस्वरूपत्वंजीवे ४
नस्वीक्रियते तदाहंचिदात्मात्वसंगश्चास्मीतिवुध्यतेजानाति ८ ॥श्रीरामायनम॥ ॥श्री॥ ॥

7

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नन्वधिष्ठाने चैतन्ये सजीवस्वरूपत्वस्वीकारे चिदात्माहमसंगोस्मीति बुध्यते इति यदुक्तं तदनुपपन्नं स्यात् अ
संगचिद्रूपस्य कूटस्थस्याहंप्रत्ययविषयत्वाभावादिति शंकते नासंग इति असंगे चिदात्मनि अविषये अहंप्र

नासंगोहं कृतिर्युक्ता कथमस्मीति चेच्छृणु एको मुख्यो द्वावमुख्यावित्यर्थस्त्रिविधोहमः ९

त्ययो न युज्यते यतो नः कथमहमस्मीति जानीयाम कथमपीत्यर्थः मुख्याया वृत्त्याहंप्रत्ययविषयत्वाभावेपि
लक्षणया तदस्तीति विवक्षुरहंशब्दार्थं तावद्विभजते एक इति अहमोहंशब्दस्येत्यर्थः ९ ।।श्री।।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त॰सि॰दी॰प॰ कीदृशोसुख्योर्थ इत्याकांक्षायां तं दर्शयति अन्योन्येति कूटस्थचिदाभासयोः स्वरूपेनन्योन्याध्यासेनैकीभावमा
५ मत्त्वं शब्दस्य वाच्यत्वेन मुख्योर्थो भवति अस्य कुतो मुख्यत्वं मतं आह तत्र मूढा इति यत इत्यध्याहारः तत्र

अन्योन्याध्यासरूपेण कूटस्थाभासयोर्वपुः एकीभूय भवेन्मुख्यस्तत्र मूढाः प्रयुंजते १०

तस्मिन्नविविक्ते कूटस्थचिदाभासयोः स्वरूपे यतो विवेकज्ञानशून्यैः सर्वैरप्यहंशब्दः प्रयुज्यते तोऽस्य मुख्यत्व ५
मित्यर्थः १०॥

9

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नन्वधिष्ठानचैतन्यस्य जीवस्वरूपत्वस्वीकारे चिदात्माहमसंगोस्मीति बुध्यते इति यदुक्तं तदनुपपन्नं स्यात् अ
संगचिद्रूपस्य कूटस्थस्याहंप्रत्ययविषयत्वाभावादिति शंकते नासंग इति असंगे चिदात्मनि अविषये अहंप्र

नासंगोहमितियुक्ता कथमस्मीति चेच्छृणु एको मुख्यो द्वावमुख्यावित्यर्थस्त्रिविधोहमः ९

त्ययो न युज्यते यतो नः कथमहमस्मीति जानीयाम् कथमपीत्यर्थः मुख्यायाव्यस्याहंप्रत्ययविषयत्वाभावेपि
लक्षणया तदस्मीति विवक्षुरहंशब्दार्थं तावद्विभजते एक इति अहमोहंशब्दस्यार्थः ९ ॥श्री॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

इदानीं अमुख्यार्थौ द्वौ दर्शयति पृथगिति आभासकूटस्थौ प्रत्येकमहंशब्दार्थत्वेन यदा विवक्षितौ तदामुख्यार्थौ भवतः अनयोरमुख्यत्वे कारणमाह तत्रेति अत्रापि यत इत्यध्याहारः तत्वविद्यतः तत्र तयोः कूटस्थचिदाभासयोरहंशब्दं लोके लौकिके वैदिके च व्यवहारे पर्यायेण प्रयुंक्ते इति योजना अयं भावः चिदाभासकूटस्थयोः

पृथगाभासकूटस्थावमुख्यौ तत्र तत्त्ववित् पर्यायेण प्रयुंक्तेऽहंशब्दं लोके च वैदिके ॥

अविविक्तरूपस्य सार्वजनीनव्यवहारविषयत्वान्मुख्यार्थत्वं विविक्तरूपस्य तु कतिपयजनैः कदाचिदेव व्यवह्रियमाणत्वादमुख्यार्थत्वमिति ॥ ॥श्रीरामाय नमः॥श्रीरामचंद्राय नमः॥श्रीजगन्नाथाय नमः॥ श्री॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त॰सि॰दी॰प॰ पर्यायेण प्रयुंक्ते इत्युक्तमेवार्थं प्रपंचयति प्रतिपत्तिसौकर्यार्थं श्लोकद्वयेन लौकिकेत्यादिना बुधो विद्वानहंगच्छा
६ मीत्यादिके लौकिके व्यवहारे कूटस्थाच्चिदाभासं विविच्य तमेवाहंशब्देन विवक्षति वक्तुमिच्छति असंग इति अथ

लौकिकव्यवहारेहं गच्छामीत्यादिके बुधः विविच्यैव चिदाभासं कूटस्थात्तं विवक्षति १२ असंगोहं चि
दात्माहमिति शास्त्रीयदृष्टितः अहंशब्दं प्रयुंक्तेयं कूटस्थे केवले बुधः १३

॥ एवं बुधो शास्त्रीयदृष्टितो वे
दांतश्रवणजनितज्ञानेन केवले चिदाभासाद्विविक्ते कूटस्थे असंगोहं चिदात्माहमिति लक्षणया अहंशब्दं प्रयुंक्ते अतो ६
लक्षणया अहंशब्दार्थत्वेनाहंप्रत्ययविषयत्वसंभवात् असंगोहमस्मीति ज्ञानमुपपद्यत इत्यभिप्रायः १३

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ननु परगाभासकूटस्थावहं शब्दस्यामुख्यार्थाविसुक्तं तयोर्मध्ये कूटस्थः किमज्ञान निवृत्तये संगोस्मीति जानाति किंवा चिदाभासः न तावत् कूटस्थः तस्यासंग चिद्रूपत्वेन ज्ञानित्वाज्ञानित्वयोरनुपपत्ते रतश्चिदाभासस्य ज्ञानित्वादिकं वक्तव्यं तथा सति कूटस्थादन्यश्चिदाभासोहं कूटस्थोस्मीति न ज्ञातुमर्हतीति शंकते ज्ञानितेति

ज्ञानिताज्ञानिते त्वात्माभासस्यैव नाचात्मनः तथाच कथमाभासः कूटस्थोस्मीति बुध्यतां १४
नायं दोषश्चिदाभासः कूटस्थैकस्वभाववान् आभासत्वस्य मिथ्यात्वात् कूटस्थत्वावशेषणात् १५

१४ तस्य कूटस्थादन्यत्वमेवासिद्धत्वमिति परिहरति नायमिति तत्रोपपत्तिमाह आभासत्वस्येति यथा दर्पणे प्रतीयमानस्य मुखाभासस्य ग्रीवास्थमुखमेवतत्वं तद्वदिति भावः १५ ॥श्रीरामायनम॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

न सिदीप० ननु चिदाभासस्य मिथ्यात्वे तदाश्रितं कूटस्थोऽस्मीति ज्ञानमपि मिथ्या स्यादिति शंकते कूटस्थोऽस्मीति कूट-
७ स्थस्वरूपातिरिक्तस्य कृतत्नस्यापि मिथ्यात्वाभ्युपगमान्मिथ्यात्वमस्माकमिष्टमेवेति परिहरति नेतीति॥

कूटस्थोऽस्मीति बोधोऽपि मिथ्या चेन्नेति को वदेत्
न हि सत्यतयाभीष्टं रज्जुसर्पविसर्पणं २६

उक्तमर्थं दृष्टान्तेन स्पष्टयति नहीति रज्ज्वां कल्पितस्य सर्पस्य गत्यादिकमपि प्रतीयमानं वास्तवं नांगीक्रियते यथा ७
तद्वदिति भावः २६ नमः पंकजनाभाय नमः पंकजमालिने नमः पंकजनेत्राय नमः स्ते पंकजांघ्रये १

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ज्ञानस्य मिथ्यात्वे तेन संसारनिवृत्तिर्नस्यादित्याशंक्य निवर्त्यस्य संसारस्यापि तथात्वात्तन्निवृत्तिरुपपद्यते॥ स्वा
प्नस्याप्रदर्शनेन निद्रानिवृत्तिवदित्यभिप्रायेणाह तादृशेनापीति तत्र यादृशो यक्षस्तादृशो बलिरिति लौ
किकगाथां संवादयति यक्षानुरूपो हीति १७ उपपादितमर्थमुपसंहरति तस्मादिति यस्मात्कूटस्थ

तादृशेनापि बोधेन संसारो विनिवर्त्तते यक्षानुरूपो हि बलिरित्याहुर्लौकिका जनाः १७ तस्मा
दाभासपुरुषः सकूटस्थो विविच्य तं कूटस्थोऽस्मीति विज्ञातुमर्हतीत्यभ्यधाच्छ्रुतिः १८

एवं चिदाभासस्य निजं स्वरूपं तस्मात्पुरुषशब्दवाच्यः कूटस्थसहित। चिदाभासस्तं कूटस्थं मिथ्याभूतात्स्व।
स्माद्विविच्य लक्षणया कूटस्थोऽस्मीत्यवगन्तुं शक्नोतीत्यभिप्रायेण श्रुतिरस्मीत्युक्तवतीत्यर्थः १८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त्त्विदी प० एवंपुरुषोस्मीतिपदद्वयमयोगाभिप्रायमभिधायअयमितिपदप्रयोगाभिप्रायमाह असंदिग्धेति लौकिका
८ ६ नांप्रसिद्धे देहरूपेआत्मनिसंशयविपर्ययरहितोऽयमस्मीतिबोधोयँदुपलभ्यते अत्रप्रत्यगात्मनिविषयेन

असंदिग्धाविपर्यस्तबोधोदेहात्मनीक्ष्यते तद्वदत्रेतिनिर्णेतुमयमित्यभिधीयते १९

दृन्तथाविधंज्ञानंमुक्तिसिद्धयेसंपाद्यमितिनिर्णेतुमयमित्यभिधीयतेऽस्त्येतिशेषः १९ ॥श्रीरामायनमः॥ ८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ईदृशस्यैव बोधस्य मोक्षसाधनत्वे आचार्यवाक्यं संवादयति देहात्मेति अहं मनुष्य इति देहात्मविषयो दृढप्रत्ययो यथैवं प्रत्यगात्मन्येव देहात्मेत्येवं देहात्मत्वज्ञानापबाधनेन ब्रह्माहमस्मीति ज्ञानं यस्य जायते स विद्वान् नेच्छन्नपि मोक्षेच्छारहितोऽपि मुच्यते संसारहेतोरज्ञानस्य ज्ञानेनापबाधितत्वादिति भावः २० अयमिति पदप्रयो

देहात्मज्ञानवज्ज्ञानं देहात्मज्ञानबाधकं आत्मन्येव भवे स्य स नेच्छन्नपि मुच्यते २० अयमित्यपरो य
क्षत्वमुच्यते चेत्तदुच्यतां स्वयंप्रकाशचैतन्यमपरोक्षं सदा यतः २१

ऽऽगस्याभिप्रायांतरं शंकते अयमिति यथायं घट इत्यादिप्रयोगेष्विदमा निर्दिष्टस्य वस्तुनः आपरोक्ष्यं दृष्टं तथायमस्मीत्यत्रापीति भावः तदप्यस्माकमिष्टमेवेत्याह तदुच्यतामिति कुत इत्यत आह स्वयंप्रकाशेति साधनांतरनिरपेक्षतयावभासमानं चैतन्यं व्यवधायकाभावान्नित्यापरोक्षमित्यस्माभिरभ्युपगतत्वादित्यर्थः २१ श्रीरामाय नमः॥ श्री ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तृप्तिदी॰प॰ ननुआत्मनःस्वप्रकाशचिद्रूपत्वेननित्यापरोक्षाभ्युपगमेयुमितिपदप्रयोगस्याभिप्रायंवनरर्णनांगीकारवलाद्दृ

८ गतमात्मनःपरोक्षाविषयत्वमपरोक्षविषयत्वंचपूर्वोक्तंज्ञानाज्ञानाश्रयविषयत्वंवानुपपन्नंस्यादित्याशंक्य

दशमइवसर्वमुपपत्स्यतइत्याह परोक्षमिति परोक्षमपरोक्षंचेत्येकंयुगुलंज्ञानमज्ञानमित्यपरमिदंद्वयंनि

परोक्षमपरोक्षंचज्ञानमज्ञानमित्यदः नित्यापरोक्षरूपेपिद्वयंस्याद्दशमेयथा २२ नवसंख्या
हृतज्ञानोदशमोविभ्रमात्तदा नवेत्तिदशमोस्मीतिवीक्ष्यमाणोपितान्नव २३

त्यापरोक्षरूपेप्यात्मनिदशमइवस्यादित्यर्थ २२ दृष्टांतंस्फुटयति नवसंख्येति परिगणनीयपुरुषनिष्ठया
नवसंख्ययापहृतविवेकज्ञानोदशमस्तदातान्परिगणनीयान्नवसंख्याकान्वीक्ष्यमाणोपिसम्मूढप्रज्ञ ८
पिभ्रांत्यागणनाकर्तारंस्वमात्मानंदशमोहमस्मीतिनवेत्तीत्यर्थ २३ ॥श्रीरामचंद्रायनम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

एवंदशमेऽज्ञानेन मद्दर्शितत्कार्यमावरणंदर्शयति नभातीति तदादशमः स्वंदशमंसंतंदशमोनभातिनास्तीतिमत्वा
वक्ति अस्यव्यवहारस्ययत्कारणंतदज्ञानकृतमज्ञानकार्यमावरणंविदुर्बुधा इतिशेषः २४ अज्ञानस्यैवकार्यंवि

नभातिनास्तिदशमइतिस्वंदशमंतदा मत्वावक्तितदज्ञानकृतमावरणंविदु २४ नघ्नंम
मारदशमइतिशोचन्प्ररोदिति अज्ञानकृतविक्षेपंरोदनादिंविदुर्बुधाः२५ नमृतोदश
मोस्तीतिश्रुत्वाप्तवचनंतदा परोक्षत्वेनदशमंवेत्तिस्वर्गादिलोकवत् २६ श्रीरामं

क्षेपंविक्षेपंदर्शयति नघ्नामिति २५ दशमस्यासत्वांशनिवर्त्तकंपरोक्षज्ञानमाह नमृतइति २६

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त॰प्रदी॰प॰ तस्मैवाभ्रान्तांशनिवर्तकंअपरोक्षज्ञानंदर्शयति त्वमेवेति स्वेनपरिगणितैर्नवभिःसहस्वात्मानंगणयित्वात्वमेव
१० दशमोसीतिप्रदर्शितोहंदशमोस्मीत्यपरोक्षतयाज्ञात्वाहर्षमाप्नोति रोदनंचत्यजति २७ एवंदृष्टांतमुक्त्वेद

त्वमेवदशमोसीतिगणयित्वाप्रदर्शितः अपरोक्षतयाज्ञात्वाहृष्यत्येवनरोदिति २७
अज्ञानावृतिविक्षेपद्विविधज्ञानतृप्तयः शोकापगमइत्येतेयोजनीयाश्चिदात्मनि २८

शमेप्रदर्शितमवस्थासप्तकमनूद्यदार्ष्टांतिकेआत्मन्यपियोजनीयमित्याह अज्ञानेति अज्ञानंचावृतिश्चवि १०
क्षेपश्चद्विविधज्ञानंतृप्तिश्चेतिद्वंद्वसमासः २८ ॥श्रीरामचंद्रायनमः॥ श्रीरामायनमः॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तत्रात्मन्यज्ञानादिकं क्रमेण दर्शयति संसारासक्तेत्यादिना अयं चिदाभासो विषयसंपादनादिध्यानासक्तचित्तः सन्कदाचन स्फुरति विचारात्पूर्वं कदाचित्स्वतत्त्वं स्वस्य निजं रूपं स्वप्रकाशचिद्रूपं कूटस्थं प्रत्यगात्मानं नैव वेत्ति न जाना

संसारासक्तचित्तः संश्चिदाभासः कदाचन स्वयंप्रकाशकूटस्थं स्वतत्त्वं नैव वेत्त्ययं २९ न भाति
नास्ति कूटस्थ इति वक्ति प्रसंगतः कर्त्ता भोक्ताहमस्मीति विक्षेपं प्रतिपद्यते ३० ॥ श्री ॥

तीति यत्तदज्ञानं २९ न भातीति चिदात्मविषये प्रसंगे जाते कूटस्थो नास्ति न भातीति प्रत्याब्रूते इदमज्ञानकार्यमावरणं कूटस्थासत्त्वाभानाभिधानवत्कर्तृत्वादिकमात्मन्यारोपयति अस्यारोपस्य हेतुर्देहद्वययुतश्चिदाभासो विक्षेपः ३०

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तृप्तिदीप० परेण बोधितः कूटस्थोऽस्तीति जानाति इदं परोक्षज्ञानं श्रवणादिपरिपाकवशात् कूटस्थोऽहमेवास्मीति जानाति इ
११ दमपरोक्षज्ञानं ३१ कूटस्थासंगात्मज्ञानानंतरं कर्तृत्वादिशोकजातं त्यजतीति यदर्थं शोकापगमः कृत्यं कर्तं

अस्तिकूटस्थ इत्यादौ परोक्षं वेत्ति वार्त्तया पश्चात्कूटस्थ एवास्मीत्येवं वेत्ति विचारतः ३१ कर्त्ता
भोक्तेत्येवमादि शोकजातं प्रमुंचति कृतं कृत्यं प्रापणीयं प्राप्तमित्येव तुष्यति ३२ अज्ञान
मावृतिस्तद्वद्विक्षेपश्च परोक्षधीः अपरोक्षमतिः शोकमोक्षस्तृप्तिर्निरंकुशा ३३

त्य० जातं कृतं निष्पादितं प्रापणीयं फलजातं प्राप्तं लब्धमिति तुष्यतीयं तृप्तिरित्यर्थ ३२ दार्ष्टांतिकेऽप्युक्तमवस्था ११
सप्तकमनुवदति अज्ञानमिति ३३

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ननु सप्तावस्था सप्तकस्यात्मधर्मत्वांगीकारे तस्य कूटस्थत्वं व्याहन्येतेत्याशंक्य एताः सप्तावस्थाश्चिदाभासस्यैव न कूटस्थ
स्येत्याह सप्तावस्था इति सर्वं वाक्यं सावधारणमिति न्यायेन चिदाभासस्यैव न कूटस्थस्येत्यवगम्यते आसामन्योन्या

सप्तावस्था इमाः संति चिदाभासस्य तास्विमौ बंधमोक्षौ स्थितौ तत्र तिस्रो बंधकृतः स्मृताः ३७

सोऽवथेत्याशंक्यानवथा बंधमोक्षकारित्वद्योतनफलत्वादुपन्यासस्येत्यभिप्रायेणाह तास्विमाविति किमासां सप्ताना
मप्यविशेषेण बंधमोक्षकारित्वं नेत्याह तत्र तिस्र इति अज्ञानावरणविक्षेपरूपास्तिस्र इत्यर्थः ३४

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

१ नजानामीति

त॰सि॰दी॰प॰ आसांबंधकारित्वदर्शनायतिसृणामपिस्वरूपंमत्सेकंकार्यमदर्शनेनस्पष्टी चिकीर्षुरज्ञानस्यस्वरूपंतावद्दर्शयति॥
१२ आत्मतत्वविचारस्यमार्गभावसहितमुदासीनव्यवहारस्यकारणंनजानामीत्यनुभूयमानमज्ञानमीरितमित्यर्थः

नजानामीत्युदासीनव्यवहारस्यकारणं विचारमार्गभावेनयुक्तमज्ञानमीरितं ३५ अमा
र्गेणविचार्याथनास्तिनोभातिचेत्यसौ विपरीतव्यवहृतिरावृतेःकार्यमिष्यते ३६

॥३५॥आवृतिकार्यंदर्शयति अमार्गेणेति शास्त्रेक्तमकारमतिलंघ्यकेवलंतर्केणविचार्यानंतरंकूटस्थोनास्ति १२
नभातीत्येवंरूपोविपरीतव्यवहारआवृत्तिकार्यमित्यर्थः ३६ ॥श्रीरामायनमः ॥श्रीरामचंद्रायनमः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

विक्षेपस्वरूपं तत्कार्यं च दर्शयति देहद्वयेति स्थूलसूक्ष्मात्मशरीरद्वयसहितश्चितेश्चिदाभास एव विक्षेपः बंधकः बंध
हेतुः संसाराख्यः कर्तृत्वाद्यखिलशोकोऽस्य चिदाभासस्य कार्यमिति शेषः कर्तृत्वादीत्यादिशब्देन प्रमातृत्वादयो
गृह्यंते २७ ननु समावस्थाश्चिदाभासस्येत्युक्तमनुपपन्नं अज्ञानवरणयोर्विक्षेपोत्पत्तेः पुरास्थितत्वाच्चिदा

देहद्वयचिदाभासरूपो विक्षेप ईरितः कर्तृत्वाद्यखिलः शोकः संसाराख्योऽस्य बंधकः २७ अज्ञा
नमावृतिश्चैते विक्षेपात् प्राक् प्रसिध्यतः यद्यप्यथाप्यवस्थे ते विक्षेपस्यैव नात्मनः २८ ॥श्री॥

भासस्य च विक्षेपांतःपातित्वात्तदवस्थात्वानुपपत्तेरित्याशंक्याह ॥ अज्ञानमिति अनयोर्विक्षेपात्पुरास्थितत्वे
पि नात्मावस्थात्वं तस्यासंगत्वेन अवस्थावत्त्वानुपपत्तेरतः परिशेषाच्चिदाभासावस्थात्वमेतयोर्वक्तव्यमिति भावः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त्सिदीप॰ अवस्थावतो विक्षेपस्य तदानीमभावात्तदवस्थात्वाभिधानमनुपपन्नमित्याशंक्य विक्षेपाभावेपि तत्संस्कार
१३ स्य तदानीं सत्वाद्विक्षेपावस्थात्वाभिधानं न विरुध्यत इत्याह विक्षेपेति ततः कारणात्तयोस्तदवस्थात्ववर्ण

विक्षेपेऽसत्यतः पूर्वमपि विक्षेपसंस्कृतिः अस्त्येव तदवस्थात्वमविरुद्धं ततस्तयोः ३९ ब्रह्म
रूपारोपितत्वेन ब्रह्मावस्थे इमे इति न शंकनीयं सर्वासां ब्रह्मरूपे वाधिरोपणात् ४०

नमविरुद्धमिति योजना ३९ नन्वप्रसिद्धसंस्कारास्युपगमद्वारा विक्षेपावस्थात्ववर्णनाद्वरमधिष्ठानतयाप्र १३
सिद्धब्रह्मावस्थात्ववर्णनमित्याशंक्याऽतिप्रसंगान्नैवमिति परिहरति ब्रह्मणीति ४० ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ननु ब्रह्मण्यारोपितत्वाविशेषेपि विक्षेपोत्पत्त्युत्तरकालभाविनीनां संसारित्वाद्यवस्थानां जीवाश्रितत्वेन अनु
भूयमानत्वान्न ब्रह्मावस्थात्वमिति शंकते संसार्यहमिति संसारः कर्तृत्वादिधर्मवान् विबुद्धः तत्त्वसाक्षा

संसार्यहं विबुद्धोहं निःशोकस्तुष्ट इत्यपि जीवगा उत्तरावस्था भांति न ब्रह्मगा यदि ४१

त्कारवान् निःशोकः शोकरहितः तुष्टो वक्ष्यमाणकृतकृत्यत्वादिजनितसंतोषवान् अहमस्मीत्युत्तरावस्था जीव
गा जीवाश्रिता भांति न ब्रह्माश्रिता इत्यर्थः ४१

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

एवं तर्हि अज्ञानावरणयोरपि जीवाश्रितत्वेन अनुभूयमानत्वात् जीवावस्थात्वमेवेति परिहरति तत्त्वज्ञोऽहं
ब्रह्मेति मद्दृष्टितो मम अनुभवेनेत्यर्थः ४२ ननु तत्त्वे अज्ञानाश्रयत्वं ब्रह्मणः पूर्वाचार्यैः कथमुक्तमित्याशंक्यात।

तत्त्वज्ञोऽहं ब्रह्मसत्वभानेमद्दृष्टितो न हि इति पूर्वैर्अवस्थेत्वभासेते जीवगे खलु ४२ अज्ञान
स्याश्रयो ब्रह्मेत्यधिष्ठानतया जगुः जीवावस्थात्वमज्ञानाभिमानित्वाद्वादिवं ४३ ॥श्री॥

द्विवक्षां दर्शयति अज्ञानस्येति ब्रह्मणोऽज्ञानाधिष्ठानत्वविवक्षया तदाश्रयत्वमुक्तमित्यर्थः भवद्भिस्तर्हि १४
किं विवक्षया जीवावस्थात्वमुक्तमित्याशंक्य स्वविवक्षां दर्शयति जीवावस्थात्वमिति ४३॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

एवं बंधहेतुमवस्थात्रयं प्रदर्श्य विशिष्टास्ववस्थासु मध्ये पूर्वोक्ताज्ञानावरणनिवृत्तिद्वारा मुक्तिहेतुमवस्थाद्वयं
दर्शयति ज्ञानद्वयेनेति परोक्षत्वापरोक्षत्वलक्षणेन ज्ञानद्वयेन आवरणकारणे ज्ञाने नष्टे सति तत्कृतावृतिस्ते
नाज्ञानेनोत्पादितं न भाति नास्तीति व्यवहारकारणं द्विविधमपि आवरणं कारणाभावान्नश्यतीति ४४

ज्ञानद्वयेन नष्टेऽस्मिन्नज्ञाने तत्कृतावृतिः न भाति नास्ति चेत्येषा द्विविधापि विनश्यति ४४ परो
क्षज्ञानतो नश्येदसत्वावृतिहेतुता अपरोक्षज्ञाननाश्या ह्यभानावृतिहेतुता ४५ ॥श्री॥

कस्यांशस्य केन निवृत्तिरित्यपेक्षायामुभयं विभज्य दर्शयति परोक्षेति कूटस्थोऽस्तीत्येवंरूपात्परोक्षज्ञानादज्ञानस्या
सत्वावरणकारणत्वं निवर्तते कूटस्थोऽस्मीत्यपरोक्षज्ञाने न तु कूटस्थो न भातीत्येवंरूपावरणकारणत्वं निवर्तते ४५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मि

 इदानीं ज्ञानस्य फलरूपावस्थाद्वये प्रथमावस्थामाह अभानेति अभानावरणे निवृत्ते भ्रान्तिसामग्रीयमानस्य जी
१५ वत्वस्यापि निवृत्तत्वात्तन्निमित्तकः कर्तृत्वादिलक्षणः संसाराख्यः शोकः सर्वोपि निवर्तते इत्यर्थः ४६ एवं शोका

अभानावरणे नष्टे जीवत्वारोपसंक्षयात् कर्तृत्वाद्यखिलः शोकः संसाराख्यो निवर्तते ४६ निवृत्ते
सर्वसंसारे नित्यमुक्तत्वभासनात् निरंकुशा भवेत्तृप्तिः पुनः शोकासमुद्भवात् ४७ ॥श्री॥

पगमरूपामवस्थां प्रदर्श्य निरंकुशा तृप्तिलक्षणां द्वितीयां दर्शयति निवृत्त इति ४७ यद्वत्सुखदुःखानामव १५
यवभेदादनेकता देहे तद्वद्विहासद्भेदेप्यनुभवं वैचित्र्यमात्मनामेषां ॥ श्री ॥ ॥श्री॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ननु आत्मानं चेद्विजानीयादिति मंत्रव्याख्याने प्रवृत्तैर्हि त्वया मध्ये ज्ञानाद्यवस्थासप्तकनिरूपणं प्रकृतासंगतमि त्याशंक्य आत्मानं चेदित्यस्याः श्रुतेस्तात्पर्यनिरूपणशेषत्वेन अभिहितत्वान्न प्रकृतासंगतमित्यभिप्रेत्य श्रुतिता

अपरोक्षज्ञानशोकनिवृत्त्याख्ये उभे इमे अवस्थे जीवगे ब्रूते आत्मानं चेदिति श्रुतिः ४८

त्पर्यमाह अपरोक्षेति चिदाभासनिष्ठं यदवस्थासप्तकमस्ति तत्रापरोक्षज्ञानशोकनिवृत्तिलक्षणमवस्थाद्वयं प्रतिपादयितुमयं मंत्रः प्रवृत्त इत्यभिप्रायः ४८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त.प्र.दी.व॰ अयमित्यपरोक्षत्वमित्यत्रायमिति पदेनात्मनोपरोक्षत्वमुच्यतइत्युक्तं ॥ तथा सत्यपरोक्षज्ञानविषयत्व
१६ मेवस्यान्नपरोक्षज्ञानविषयत्वं इत्याशंक्य तदुपपादनाय अपरोक्षज्ञानं विभजते अयमिति द्वैविध्येका

अयमित्यपरोक्षत्वमुक्तं न द्विविधं भवेत् । विषयस्वप्रकाशत्वाद्धियाप्येवं तदीक्षणात् ४९

रणमात्रविषयेति । विषयस्य चिद्रूपस्यात्मनः स्वप्रकाशत्वात् स्वव्यवहारे साधनांतरनिरपेक्षत्वाद्धियावु १६
ध्याप्येवं स्वप्रकाशत्वेन तदीक्षणात् स्वविषयस्यात्मनोवलोकनादित्यर्थः ४९ ॥श्रीरामायनमः।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भवतु द्वैविध्यमेतावता परोक्षज्ञानविषयत्वे किमायातमित्याशंक्य विषयस्वप्रकाशत्वं परोक्षज्ञानविषयत्वे
विरोधि न भवतीत्याह परोक्षेति अपरोक्षज्ञानकाल इव परोक्षज्ञानकालेपि विषयस्य ब्रह्मणः स्वप्रकाशता

परोक्षज्ञानकालेपि विषयस्वप्रकाशता समा ब्रह्मप्रकाशत्वमस्तीत्येवं विबोधनात् ५० अहं
ब्रह्मेत्यनुल्लिख्य ब्रह्मास्तीत्येवमुल्लिखन् परोक्षज्ञानमेतन्न भ्रांतं बाधानिरूपणात् ५१

त्येव॥ तत्रोपपत्तिमाह समा ब्रह्मेति ५० प्रत्यगभिन्नब्रह्मगोचरस्य ज्ञानस्य कुतः परोक्षत्वमित्याशंक्य प्रमेयांशा भ्रांतं
णादित्याह अहं ब्रह्मेति ॥५१॥ ॥ त्य

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ध्या.दीप. ननु इदं भ्रांतमिति सार्वत्रिकस्य भ्रांतत्वं किंवा धूमत्वात् उत अन्तस्तुल्लेखाद् अथवा परोक्षेण ग्रहणयोग्यस्य परोक्षे
१७ ग्रहणाघट्टांशग्रहणादिति चतुर्धा विकल्प्य प्रथमं प्रत्याह एतन्नेति हेतुं विवृणोति ब्रह्म नास्तीति ५२

ब्रह्म नास्तीति मानं चेत्स्याद्बाध्येत तदा ध्रुवं न चैवं प्रबलं मानं पश्यामो तो न बाध्यते ५२
अन्तस्तुल्लेखमात्रेण भ्रमत्वे स्वर्गधीरपि भ्रांतिः स्यान्मूर्त्युल्लेखात्सामान्योल्लेखदर्शनात् ५३

द्वितीयमतिप्रसंगेन दूषयति अन्तस्तुल्लेखेति अयं स्वर्ग इत्येवमाकारेण ग्रहणाभावात् किंतु स्वर्गोस्तीत्येवं सा १७
मान्याकारेण प्रतीतेः स्वर्गबुद्धेरपि भ्रमत्वप्रसंग इत्यर्थः ५३ ॥श्रीरामायानमः॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तृतीयं निराकरोति अपरोक्षत्वमिति अपरोक्षत्वेन ग्रहणयोग्यस्य प्रत्यगभिन्नब्रह्मविषयस्य परोक्षज्ञानस्य
भ्रमत्वं न संभवति कुत इत्यत आह परोक्षमिति ब्रह्म परोक्षमित्येवमाकारेण ग्रहणाभावात् कुतस्तर्हि

अपरोक्षत्वयोग्यस्य न परोक्षमतिर्भ्रमः परोक्षमित्यनुल्लेखादर्थात्पारोक्ष्यसंभवात् ५४
अंशागृहीतिर्भ्रान्तिश्चेद्घटज्ञानं भ्रमो भवेत् निरंशस्यापि सांशत्वं व्यावर्त्यांशविभेदतः ५५

तस्य परोक्षत्वमित्याशंक्याह अर्थादिति इदं ब्रह्मेत्येवं व्यक्त्युल्लेखाभावसामर्थ्यात्परोक्षत्वसिद्धेरिति भावः ५४
चरममाशंकते ब्रह्मांशग्रहणेपि प्रत्यगंशाग्रहणात् भ्रमत्वमित्यर्थः श्रीरामायनमः ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तृप्तिदीप० एवं तर्हि घटादिज्ञानस्यापि भ्रमत्वप्रसंग इति परिहरति घटेति आंतरावयवानां अग्रहणादिति भावः ननु
१८ घटस्य सावयवत्वादंशाग्रहणेपि अंशाग्रहणं संभवति ब्रह्मणस्तु निरंशत्वात्कथमंशाग्रहणसंभवइ

असत्त्वांशो निवर्तेत परोक्षज्ञानतस्तथा अभानांशनिवृत्तिः स्यादपरोक्षधियाकृता ५६

सांशत्वस्यावस्तोंशोपाधिनिमित्तकं सांशत्वं तस्य भविष्यतीत्याह निरंशेति ५५ नोक्तो ह्यावस्तीशावि। १८
साकांक्षायामाह असत्त्वांश इति ५६ श्रीकृष्णायनमः॥ ॥श्रीरामायनमः॥ ॥श्रीरामचंद्रायन

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अपरोक्षत्वेन ब्रह्मणोपविषयं परोक्षज्ञानं भ्रमो न भवतीत्येतद्दृष्टांतप्रदर्शनेनापि द्रढयति दशमइति दशमोस्ती
त्याप्तवाक्यजन्यं परोक्षज्ञानमभ्रांतं यथा ब्रह्मास्तीतिवाक्यजन्यज्ञानमपि तद्वदभ्रांतं स्याद्ज्ञानं तु तस्यासत्वावरणं

दशमोस्तीत्यविभ्रांतं परोक्षज्ञानमाप्यते ब्रह्मास्तीत्यपि तद्वत्स्याद्ज्ञानावरणं समं ५७ आ
त्माब्रह्मेति वाक्यार्थे निःशेषेण विचारिते अक्तिरुल्लिख्यते यद्वद्दशमस्त्वमसीत्यतः ५८

स शस्यसमत्वादिति भावः ५७ ननु वाक्यात्परोक्षज्ञानमुत्पद्यते चेदपरोक्षज्ञानं कुतो जायत इत्याशंक्य विचारसहिताद्वाक्या
देवेत्याह आत्माब्रह्मेति अयमात्माब्रह्मेति महावाक्यार्थे स॥ श्रीरामायनम॥ श्रीरामचंद्रायनम॥ श्री॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तृप्तिदीप० स्वविचार्यमाणे पूर्वमस्तीति परोक्षतयावगतस्य ब्रह्मणः प्रत्यगभिन्नत्वं साक्षात्क्रियते तत्र दृष्टान्तः यद्वदिति
२९ दशमस्त्वमसीत्येतो वाक्यादात्मनि दशमत्वं यथा साक्षात्क्रियते तद्वदित्यर्थः ५८ विचारसहकृतेन वाक्येन अ

दशमः क्वेति प्रश्ने त्वमेवेति निराकृते गणयित्वा स्वेन सह स्वमेव दशमं स्मरेत् ५९

परोक्षज्ञानोत्पत्तिप्रकारं तावद्दृष्टान्ते न दर्शयति दशम इति त्वयास्तीति दशमो निरूपितः दशमः क्वेति प्रश्ने कृ १९
तेन त्वमेवेति परिहारे अभिहिते स्वात्मना सहैव नवगणयित्वाहं दशमोऽस्मीति स्वयमेव दशमं स्मरेदित्यर्थः
५९

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अस्मद्दशमोऽस्मीतिज्ञानस्य विचारसहितवाक्यजनितत्वान्नविपर्ययादिरूपतेत्याह दशमोऽस्मीति अस्मद
शमस्त्वमेवदशमोऽसीतिवाक्यात्परिगणनादिलक्षणविचारसहितादुत्पन्ना अहंदशमोऽस्मीति बुद्धिर्नविह

दशमोऽस्मीतिवाक्योत्था नधीरस्य विहन्यते आदिमध्यावसानेषु न नवत्वस्य संशयः ६०

न्यते नकेनापिज्ञानेन बाध्यते परिगणनक्रियायां चनवानामादिमध्यावसानेषु परिगणनेप्यहंदशमो
नवेति संशयश्च न भवेदतः सा दृढापरोक्षरूपेत्यर्थः ६०

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तृप्तिदी० एवं तत्सर्वं दार्ष्टान्तिके योजयति सदेवेत्यादिना सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयं ब्रह्मेत्यादिवाक्येन ब्र

२० ह्मसद्भावमथमनिश्चित्य तत्सृष्ट्वा जीवरूपेण प्रवेशादियुक्तिपर्यालोचनया तत्स्वरूपत्वं संभाव्य तत्त्वमसीत्या

सदेवेत्यादिवाक्येन ब्रह्मसत्त्वं परोक्षतः गृहीत्वा तत्त्वमस्यादिवाक्याद्व्यक्तिं समुल्लिखेत् ६१
आदिमध्यावसानेषु स्वस्य ब्रह्मत्वधीरियं नैवाव्यभिचरेत्तस्मादापरोक्ष्यं प्रतिष्ठितं ६२

दिवाक्येन अद्वितीयब्रह्मरूपमात्मानमहं ब्रह्मास्मीति साक्षात्कुर्या ॥६१॥ तदेतद्द्वयमात्मनो ब्रह्मत्वबुद्धिः पं
चानां कोशानामादिमध्यावसानेषु आत्मनोऽव्यवहारेऽपि नैवान्यथा भवति अतोऽस्या बुद्धेरपरोक्षज्ञानत्वं सुस्थि

पंचदशी टि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नन्वेवंप्रथमतःकेवलवाक्यात्परोक्षज्ञानमुत्पद्यतेपश्चाद्विचारसहितमद्परोक्षज्ञानमित्येतत्कुतोऽवगम्यतइत्याशंक्य
तैत्तिरीयकादिश्रुत्यर्थपर्यालोचनयेत्याह जन्मादीति भृगुर्नामकःकश्चित्तुऋषिः पुरायतोवाइमानिभूतानिजा

जन्मादिकारणत्वाख्यलक्षणेनभृगुःपुरा परोक्षेणगृहीत्वाथविचाराद्व्यक्तिमैक्षत ६२

यन्तेयेनजातानिजीवन्तियत्प्रयन्त्यभिसंविशन्तितद्विजिज्ञासस्वतद्ब्रह्मेतिवाक्यस्थेनजगज्जन्मादिकारणत्वाख्य
लक्षणेनजगत्कारणंब्रह्मपरोक्षतयावगम्यान्नमयादिपंचकोशविचाराद्व्यक्तिंप्रत्यगात्मनोरूपंब्रह्मदृष्टवानित्य

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तृप्तिदीप॰ नन्वस्मिन्प्रकरणे त्वं ब्रह्मासीत्येवमाद्युपदेशवाक्याभावात्कथं भृगोरात्मतत्त्वसाक्षात्कार इत्याशंक्य आत्मसा
२३ क्षात्कारहेतुविचारयोग्यस्थलप्रदर्शनादित्याह यद्यपीति ६४ ननु अन्नमयादिकोशेषु विचारितेषु मतौ।
वो साक्षात्कारो भवतु ब्रह्मणस्तु कथमित्याशंक्य मतौ चाऽऽव ब्रह्मत्वात् संचकोश विचारेण आनंदात्मव्यक्तिः सा।

यद्यपि त्वमसीत्यत्र वाक्यं नोक्तं भृगोः पिता तथाप्यन्नं प्राणमिति विचार्य स्थलमुक्तवान् ६४ अ
न्नप्राणादिकोशेषु सुविचार्य पुनः पुनः आनंदव्यक्तिमीक्षित्वा ब्रह्मलक्ष्माप्यबूबुधत् ६५

क्षात्कृतस्य आनंदाद्ध्येव खल्विमानि भूतानि जायंत इत्यादि संविशंतीत्यंतमित्येवं ब्रह्मलक्षणेऽपि मतौ एवं योजि २९
तवानित्याह अन्नप्राणादीति ६५ म

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ननु ब्रह्मलक्षणस्यानंदात्मरूपेणमनादियोजननंनघटते ब्रह्मणस्तटस्थत्वेनमतुल्योभिन्नत्वादित्याशंक्यन
भेदः सत्यादिलक्षणस्यब्रह्मणःसत्यरूपेणावस्थानश्रवणादित्याह ॥ सत्यंज्ञानमिति सत्यंज्ञानमनंतंब्रह्मे

सत्यंज्ञानमनंतंचेत्येवंब्रह्मस्वलक्षणं उक्त्वागुहाहितत्वेनकोशेष्वेतत्प्रदर्शितं ६६

त्येवंब्रह्मस्वलक्षणंब्रह्मणःस्वरूपलक्षणंअभिधाययोवेदनिहितंगुहायांपरमेव्योमन्नित्यनेनवाक्येनपंच
कोशगुहांतःस्थितत्वेनतस्यैवमत्यरूपत्वमभिहितमित्यर्थः ६६ ॥श्रीरामयनमः॥ ॥

43

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तत्त्वदी॰ एवं तैत्तिरीयकश्रुतिपर्यालोचनया भृगोः परोक्षज्ञानपूर्वकं विचारजन्यत्वं साक्षात्कारस्य दर्शयित्वा छांदोग्यश्रु-
२२ तिपर्यालोचनयापि तद्दर्शयति पारोक्ष्येणेति इंद्राय आत्मा अपहतपाप्मा विजरो विमृत्युर्विशोक इत्यादिवाक्यम

पारोक्ष्येण विबुध्येंद्राय आत्मेत्यादिलक्षणात् आपरोक्षीकर्त्तुमिच्छंश्चतुर्वारं गुरुं ययौ ६७

तिपादितेन लक्षणेन आत्मानं परोक्षतयावगत्य विचाराच्छरीरत्रयनिराकरणेन तत्साक्षात्करणाय गुरुं ब्रह्मा- २२
णं चतुर्वारमुपसन्न इति छांदोग्योपनिषदि अष्टमाध्याये श्रूयते ६७ ॥श्रीरामायनम॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

इदानीमैतरेयकश्रुतावपि तद्दर्शयति आत्मेति आत्मा वा इदमेक एवाग्र आसीत् नान्यत्किंचन मिषदित्यनेन वाक्येन ब्रह्मणो लक्षणमभिधाय स ईक्षत लोकानु सृजा इति पञ्चम्य तनस्य त्रय आवसथास्त्रयः स्वप्नाः अयमावसथो यमावसथो यमावसथ इत्यनेन परमात्मनि जगदध्यारोपणप्रकारमभिधाय स जातो भूतान्यभिव्यैरव्यत्किमिहान्यं वावदिषदिति तस्यारोपितस्यापवादमभिधाय स एतमेव पुरुषं ब्रह्म ततमपश्यदिदमदर्शमिती ति

आत्मा वा इदमित्यादौ परोक्षं प्रत्यग्लक्षितं अध्यारोपापवादाभ्यां प्रज्ञानं ब्रह्म दर्शितं ६८

३ प्रत्यगात्मनो ब्रह्मरूपत्वमभिहितं पुनश्च पुरुषे ह वा अयमादिना ज्ञानसाधनवैराग्यजननाय गर्भवासादिदुःखं प्रदर्श्य कोऽयमात्मेति वयमुपास्महे इत्यादिना विचारेण तत्त्वंपदार्थशोधनपुरःसरं प्रज्ञानं ब्रह्मेति प्रज्ञानरूपस्यात्मनो ब्रह्मत्वं दर्शितमित्यर्थः ६८ ॥श्रीरामाय नमः॥ श्रीरामचंद्राय नमः॥ श्रीजगन्नाथाय नमः॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तृप्तिदी०प० उक्तन्यायमितरासु श्रुतिष्वप्यतिदिशति अवांतरेणेति सर्वत्र सर्वासु श्रुतिष्वित्यर्थः ६९ ननु महावाक्यविचारस्या
२३ परोक्षज्ञानजनकत्वं स्वकपोलकल्पितमित्याशंक्य वाक्यवृत्तावाचार्यैस्तथा प्रतिपादितत्वान्मैवमित्याह ब्रह्मा
परोक्ष्येति अतो वाक्यात् ब्रह्मापरोक्षज्ञाने विमतिप्रतिपत्तिर्नास्तीत्यर्थः ७० वाक्यवृत्तावुपपादनप्रकारं दर्शयति

अवांतरेण वाक्येन परोक्षा ब्रह्मधीर्भवेत् सर्वत्रैव महावाक्यविचारात्त्वपरोक्षधीः ६९ ब्रह्मा
परोक्ष्यसिध्यर्थं महावाक्यमितीरितं वाक्यवृत्तावतो ब्रह्मापरोक्ष्ये विमतिर्न हि ७० आलं
बनतया भाति योऽस्मत्प्रत्ययशब्दयोः अंतःकरणसंभिन्नबोधः स त्वंपदाभिधः ७१

आलंबनतयेति योंऽतःकरणसंभिन्नबोधः अंतःकरणोपाधिकश्चिदात्मा अस्मत्प्रत्ययशब्दयोरहमितिज्ञान २३
स्याहमिति शब्दस्य चालंबनतया विषयत्वेन भाति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स तथाविधो बोधस्त्वंपदाभिधः त्वमिति पदं अभिधायकं वाचकं यस्य स त्वंपदाभिधः त्वंपदवाच्य इत्यर्थः ७५
एवं त्वंपदवाच्यार्थमभिधाय तत्पदवाच्यार्थमाह मायोपाधिरिति पारोक्ष्यशबलः परोक्षत्वधर्मविशिष्ट इ

मायोपाधिर्जगद्योनिः सर्वज्ञत्वादिलक्षणः पारोक्ष्यशबलः सत्याद्यात्मकस्तत्पदाभिधः ७२

त्यर्थः एवं तटस्थलक्षणमभिधाय स्वरूपलक्षणमाह सत्याद्यात्मक इति सत्यमादिर्येषां ज्ञानादीनां ते सत्यादयः
आत्मा स्वरूपं यस्य स तथाविधः तत्पदाभिधः तत्पदमभिधा वाचकं यस्य स तत्पदाभिधः तत्पदवाच्य इत्यर्थः
७२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त०सि०दी० एवंपदार्थाभिधायवाक्यार्थबोधनाय लक्षणावृत्तिराश्रयणीयेत्याह मत्सगिति मत्सरूपरोक्षत्वेसद्विती
२४ यत्वेनसहितापूर्णतेतिमध्यमपदलोपीसमासः सद्वितीयत्वपूर्णतेच एकस्य वस्तुनो यतो विरुध्येते अतो
लक्षणावृत्तिराश्रयणीयेत्यर्थः ७२ साचकीदृशीत्यत आह तत्त्वमस्यादीति भागलक्षणाभागत्यागल

मत्सरूपरोक्षतैकस्यसद्वितीयत्वपूर्णता विरुध्येतेयतस्तस्माल्लक्षणासंप्रवर्त्तते ७३ न
त्वमस्यादिवाक्येषु लक्षणाभागलक्षणा सोयमित्यादिवाक्यस्थपदयोरिव नापरा ७४

क्षणेत्यर्थः तत्रदृष्टांतमाह सोयमिति सोयंदेवदत्त इतिवाक्यस्थयोः सोयमितिपदयोर्यथाजहदजहल्लु २५
क्षणावृत्तिराश्रितानापरा नजहल्लक्षणानाप्यजहल्लक्षणा तद्वदत्रापीत्यर्थः ७४ ॥ श्रीरामायनमः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ननुगामानयेत्यादिवाक्येषुलक्षणाद्यभावात्तथापिवाक्यार्थबोधोदृश्यतेतद्वदत्रापिकिंनस्यादित्याशंक्याह सं
सर्गेति यथालोके गामानयेत्यादौ पदैः स्मारितानामाकांक्षासान्निध्यादिमतां गवादिपदार्थानामन्वयोवा
क्यार्थत्वेनस्वीकृतोयथावानीलंमहत्सुगंधिउत्पलमित्यादौनीलत्वादिविशिष्टस्योत्पलस्यवाक्यार्थत्वंस्वी

संसर्गोवाविशिष्टोवावाक्यार्थोनात्रसंमतः अखंडैकरसत्वेनवाक्यार्थोविदुषांमतः ७५

कृतं नैवमत्रमतेवाक्येषुसंसर्गविशिष्टयोरन्यतरस्यवाक्यार्थत्वमभ्युपगम्यतेकिंतुअखंडैकरसत्वेनस्व
मतादिभेदशून्यवस्तुमात्ररूपत्वंवाक्यार्थोविद्वद्भिरभ्युपेयते अतोलक्षणाश्रयणीयमित्यर्थः ७५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

न॰ति॰टी॰ पं॰ अखंडैकरसेवाक्यार्थे शेदयति॥ प्रत्यग्बोध इति॥ यः प्रत्यग्बोधः सर्वांतरश्चिदात्मा आभाति बुध्यादिसाक्षित्वेन स्फु
२५ रति सोऽद्वयानंदलक्षणो द्वितीयानंदरूपः परमात्मेत्यर्थः अद्वयानंदरूपश्च तथाविधः परमात्मा प्रत्यक्बोधैकलक्ष

प्रत्यग्बोधो य आभाति सोऽद्वयानंदलक्षणः अद्वयानंदरूपश्च प्रत्यक्बोधैकलक्षणः ७६ इत्थ
मन्योन्यतादात्म्यप्रतिपत्तिर्यदा भवेत् अब्रह्मत्वं त्वमर्थस्य व्यावर्त्तेत तदैव हि ७७ ॥श्री॥

णश्चिदेकरसः प्रत्यगात्मैवेत्यर्थः ७६ एवमखंडार्थबोधेन किं स्यादित्याह इत्थमिति त्वमर्थस्य प्रत्यगात्मनोऽ २५
ब्रह्मत्वं भ्रांतिसिद्धा ब्रह्मरूपता ७७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तदर्थस्य च ब्रह्मणश्चापारोक्ष्यं परोक्षज्ञानविषयत्वं च निवर्तेत ततोपि किमिति पृच्छति यद्येवमिति उत्तरमाह श्र
ण्विति ७८ ननु समयबलेन सम्यक् परोक्षानुभवसाधनमागमस्यागमलक्षणमतो वाक्यस्यापरोक्षज्ञानज

तदर्थे स च पारोक्ष्यं यद्येवं किं ततः शृणु दृग्गीनं दैकरूपेण्यमस्य ग्वो धावतिष्ठते ७८ एवं स
तिमतल्वाक्यस्यापरोक्षज्ञानमायीत यैस्तेषां शास्त्रसिद्धांतविज्ञानं शोभतेतरां ७९

नकत्वं कथमुच्यत इत्याशंक्य सिद्धांत परिज्ञानमस्यमेयमिति मनसि निधाय उपहसति एवं सतीति एवं व
दंतः सिद्धांतरहस्यं ते नैव जानंतीत्यर्थः ७९ ॥श्रीरामजी॥श्रीरामचंद्रायनमः॥श्रीरामायनमः॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त॰मि॰दी॰प॰ ननु सिद्धांतस्तावन्निष्टत्वाक्यस्य परोक्षज्ञानजनकत्वं त्वनुमानसिद्धमिति शंकते आस्तामिति विमतं वाक्यं प
२६ रोक्षज्ञानजनकं भवितुमर्हति वाक्यत्वात्स्वर्गादिप्रतिपादकवाक्यवदित्यनुमानेन परोक्षज्ञानजनकत्वं सिद्धमित्य

आस्तां शास्त्रस्य सिद्धांतो युक्त्या वाक्यात्परोक्षधीः स्वर्गादिवाक्यवन्नैवं दशमे व्यभिचारतः ८०
स्वतोऽपरोक्षजीवस्य ब्रह्मत्वमभिवांछतः नश्येत्सिद्धापरोक्षत्वमिति युक्तिर्महत्यहो ८१

र्थः अनैकांतिकोयं हेतुरिति परिहरति नैवमिति दशमस्त्वमसीति वाक्ये वाक्यत्वे सति अपरोक्षज्ञानजनकत्वस्यो २६
पलंभादिति भावः ८० किंच त्वंपदार्थस्य जीवस्यापरोक्षत्वाभावप्रसंगादपि न महावाक्यं परोक्षज्ञानजनकमभि
संगीकार्यमित्याह स्वत इति ८१

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

इष्टापत्तिरित्याशंक्याह वद्धिमिति ८२ ननु सोपाधिकत्वाज्जीवस्यापरोक्षत्वं युक्तं ब्रह्मणस्तु निरुपाधिकस्य
तन्न युज्यत इति शंकते अंतःकरणेति ८३ ब्रह्मणो निरुपाधिकत्वमसिद्धमिति परिहरति नैवमिति जीव

वद्धिमिष्टवतो मूलमपि नष्टमितीदृशं लौकिकं वचनं सार्थं संपन्नं त्वत्प्रसादतः ८२ अंतः
करणसंभिन्नबोधो जीवोऽपरोक्षतामर्हत्युपाधिसद्भावान्न तु ब्रह्मानुपाधितः ८३ नैवं
ब्रह्मत्वबोधस्य सोपाधिविषयत्वतः यावद्विदेहकैवल्यमुपाधेरनिवारणात् ८४

५. स्य ब्रह्मरूपत्वाज्ज्ञानं यदस्ति तस्य सोपाधिकवस्तुविषयत्वात्तद्विषयस्य ब्रह्मणोपि सोपाधिकत्वं ज्ञानस्य सोपा
धिकविषयत्वं च ज्ञेयस्य सोपाधिकत्वमंतरेण न घटत इति भावः तदेव कुत इत्यत आह यावदिति ८४

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

संबं

तृप्तिदीप० ननु तर्हि जीवब्रह्मणोर्विलक्षणमुपाधिद्वयं वक्तव्यमित्याशंक्याह अंतःकरणेति जीवभावब्रह्मभावयोः अं
२८ तःकरणसाहित्यराहित्ये एवोपाधी इत्यर्थः ८४ ननु अंतःकरणध[illegible]स्य भावरूपत्वादुपाधित्वमस्तु नाभाव

अंतःकरणसाहित्यराहित्याभ्यां विशिष्यते उपाधिर्जीवभावस्य ब्रह्मतायाश्च नान्यथा ८५
यथा विधिरुपाधिः स्यात्प्रतिषेधस्तथा न किं सुवर्णलोहभेदेन शृंखलात्वं न भिद्यते ८६

रूपस्य तद्राहित्यस्य तदुचितमित्याशंक्य यावत्कार्यमवस्थायि भेदहेतोरुपाधिता इत्यन्योपाधिलक्षणस्य सा २७
हित्यराहित्ययोरुभयोरपि सत्त्वादुचितमेवोपाधित्वमित्यभिप्रायेण परिहरति ॥ श्रीरामचंद्राय नमः ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यथेति विधिभावरूपोंतःकरणसंबंधो यथोपाधिःस्यात्तथा प्रतिषेधोऽभावरूपोंतःकरणवियोगो न किं उपा
धिर्नस्यात्किंस्यादेवेत्यर्थः तथा विधिभावाभावरूपत्वलक्षणमवांतरवैलक्षण्यं दृश्यतऽएवेत्याशंक्यतत्सअ

अतथ्यावृत्तिरूपेण साक्षाद्विधिमुखेन च वेदां
तानां प्रवृत्तिःस्याद्द्विधेत्याचार्यभाषितं ८७

किंचित्करत्वेन अनादरणीयत्वमित्यभिप्रेत्य दृष्टांतमाह सुवर्णेति पुरुषप्रचारनिरोधकत्वांशे अनुपयुक्तं
सुवर्णत्वलोहत्वादिवैलक्षण्यं यद्वदनादरणीयं तद्वदित्यर्थः ८८ विधिरिव निषेधस्यापि ब्रह्मबोधोपा
यत्वेन तत्त्वोपाधित्वं द्रढयितुं विधिनिषेधयोरुभयोरपि ब्रह्मबोधोपायत्वमाचार्यैर्निरूपितमिति दर्शयति॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नृसिंदीप० तिअनदिति नछब्देनब्रह्माभिधीयतेअतछब्देनतदतिरिक्तमज्ञानादिव्यावृत्तिर्निरसनंतदेवंरूपमुपायस्तेन
१८ साक्षाद्विधिमुखेनचविधिर्विधानंसाक्षाद्वाचकशब्दप्रयोगःसत्यंज्ञानमनंतंब्रह्मेत्येवमादिरूपस्तेनचसाक्षाद्वि तं
धिमुखेनतद्वारेणाप्यस्यर्थः वेदांतानामुपनिषदांप्रवृत्तिः प्रवर्तनंप्रतिपादनंब्रह्मण्णीतिशेषः ८७ ननुवेदांता
नामतद्व्यावृत्याब्रह्मबोधकत्वांगीकारेऽहंशब्दार्थस्यकूटस्थस्यापिस्यागप्रसंगादहंब्रह्मास्मीतिसामानाधिकरण्येन

अहमर्थपरित्यागादहंब्रह्मेतिधीः कुतः नैवमंशस्यहित्यागोभागलक्षणयोदितः ८८

अहमर्थेति ज्ञानंनोदेतुमर्हतीतिशंकते अहंशब्दार्थस्यसर्वस्यासत्त्वान्नैवमितिपरिहरति नैवमितिहियस्मात्कारणा
द्भागलक्षणयाजहदजहल्लक्षणया अंशस्याहंशब्दार्थैकदेशस्यजडांशस्यत्यागईरितोनकूटस्थस्यातोऽहंब्रह्मा २८
स्मीतिज्ञानमुपपद्यतइत्यर्थः ८८ ॥श्रीरामायनम ॥श्रीरामयनम॥ श्रीरायनम॥ श्रीजगन्नाथायनम॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अंशत्यागेन बोधनमाकारमभिनीय दर्शयति अंतःकरणेति ८८ ननु केवलस्य प्रत्यगात्मनः स्वप्रकाशत्वाद्बुद्धिवृ
त्तिविषयत्वेन घटत इत्याशंक्याह स्वप्रकाशोपीति अन्यवद्घटादिवदित्यर्थः स्वप्रकाशोऽहमित्येवं बुद्धिसंभ

अंतःकरणसंत्यागादवशिष्टे चिदात्मनि अहं ब्रह्मेति वाक्येन ब्रह्मत्वं साक्षिणीक्ष्यते ८९
स्वप्रकाशोऽपि साक्ष्येव धीवृत्त्या व्याप्यतेऽन्यवत् फलव्याप्यत्वमेवास्य शास्त्रकृद्भिर्निवारितं ९०

वादिति भावः नन्वर्थ्यपसिद्धांतापात इत्याशंक्य पूर्वाचार्यैरपि वृत्तिव्याप्यत्वस्यांगीकृतत्वान्नायमपसिद्धांतापात इ
त्याह फलव्याप्यत्वमिति फलं वृत्तिप्रतिबिंबितश्चिदाभासः तद्व्याप्यत्वमेवास्य प्रत्यगात्मनो निराकृतं ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तृप्तिदी० स्वस्यैवस्फुरणरूपत्वादितिभावः ९० आत्मनिफलव्याप्यत्वाभावंदर्शयितुमनात्मनोवृत्तफलेनव्याप्यत्वंद
२८ र्शयति बुद्धीति उभयव्याप्तेः प्रयोजनमाह तत्रेति तत्रतयोर्बुद्धिचिदाभासयोर्मध्येधियाबुध्याधावृत्ता

बुद्धितत्स्थचिदाभासौद्वावपिव्याप्नुतोघटं तत्राज्ञानंधियानश्येदाभासेनघटःस्फुरेत् ९१

प्रमाणभूतयाऽज्ञानंनश्यति ज्ञानाज्ञानयोर्विरोधात् आभासेनचिदाभासेनघटःस्फुरेत् जडत्वेनस्वतःस्फुर २८
णाभावादितिभावः ९१

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

इदानीं आत्मनि ततो वैलक्षण्यं दर्शयति ब्रह्मणीति मम स्वरूपब्रह्मणो रेकत्वस्याज्ञानावृतत्वात्तस्याज्ञानस्य निवृत्तये वा
काऽजन्मया ऽहं ब्रह्मास्मीत्येवमाकारया धीवृत्त्या व्याप्तिरपेक्ष्यते स्वस्यैव स्फुरणरूपत्वात्तत्स्फुरणाय चिदाभासो नापे

ब्रह्मण्यज्ञाननाशाय वृत्तिव्याप्तिरपेक्षिता स्वयंस्फुरणरूपत्वान्नाभास उपयुज्यते ९२ च
क्षुर्दीपावपेक्ष्येते घटादेर्दर्शने यथा नदीपदर्शने किंतु चक्षुरेकमपेक्ष्यते ९३

क्ष्यते अतो युज्यमानोपि चिदाभासो नोपयुज्यत इत्यर्थः ९२ उक्तमर्थं दृष्टांतप्रदर्शनेन विशदयति चक्षुरिति अं
धकारावृतघटादिदर्शने चक्षुर्दीपावुभावप्यपेक्ष्येते दीप दृष्टौ ॥श्रीरामायनम॥ श्रीरामचंद्रायनम॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तृप्तिदीप॰ नेतु तथा न किंतु एकं वस्त्रे वापि स्फुरति यथा तथा ब्रह्मरूपतां न नाशयेति पूर्वेण संबंधः ॥९३ ननु बुद्धितद्वृत्तीनां चिदाभा
३० सर्वेषि स्फुरणाभावात् घटादिष्विव ब्रह्मण्यपि फलव्याप्ति इति चेत् इत्याशंक्याह स्थितोपीति यद्यपि घटाद्याकारवृ

स्थितोप्यसौ चिदाभासो ब्रह्मण्येकीभवत्परं ॥ न
तु ब्रह्मण्यतिशयं फलं कुर्याद्घटादिवत् ९४

त्तिवत् ब्रह्मगोचरवृत्तावपि चिदाभासोस्ति तथापि नासौ ब्रह्मणो भेदेन भासते किंतु प्रचंडानलमध्यवर्तिप्रदी ३०
पप्रभावत्तेनैकीभूत इव भवति अतो न स्फुरणलक्षणातिशयजनको ब्रह्मणः समर्थः ९४ ॥श्री॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ननुब्रह्मणि फलव्याप्तिर्नास्ति वृत्तिव्याप्तिस्तु विद्यत इत्युक्तं तत्र किं प्रमाणमित्याशंक्य आगमः प्रमाणमित्याह ॥
अप्रमेयमिति निर्विकल्पमनंतं च हेतु दृष्टांतवर्जितं अप्रमेयमनादिं च यज्ज्ञात्वा मुच्यते बुधः इत्यत्रा स्मिन्नं

अप्रमेयमनादिं चेत्यत्र श्रुत्येदमीरितं मनसैवेदमाप्तव्यमिति धीव्याप्यता श्रुता ९५

त्रैश्रुत्या ऽमृतबिंदूपनिषदाम्प्रमेयशब्देनेदं फलव्याप्तिराहित्यमुक्तं मनसैवेदमाप्तव्यं नेह नानास्ति किंचनेति कठवल्ल्यां धीव्याप्यता श्रुता वृत्तिव्याप्यत्वं श्रुतमित्यर्थः ९५ ॥श्रीरामायनमः॥ ॥

61

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तृप्तिदीप॰ आत्मानं चेद्विजानीयादिति मंत्रेण अपरोक्षज्ञानशोकनिवृत्त्याख्यं जीवगतमवस्थाद्वयमभिधायते इत्युक्तं ॥ अ
२१ परोक्षज्ञानशोकनिवृत्त्याख्ये उभे इमे अवस्थे जीवगे श्रुते आत्मानं चेदिति श्रुतिः इत्यनेन श्लोकेन तत्र क्रियतां शे

आत्मानं चेद्विजानीयादयमस्मीति वाक्यतः ब्रह्मात्मव्यक्तिमुल्लिख्य यो बोधः सोभिधायते ९६

तत्र अपरोक्षज्ञानमुच्यत इत्याकांक्षायामाह आत्मानं चेदिति ब्रह्मात्मव्यक्तिं सत्यादिलक्षणं ब्रह्माभिन्नमत्यगात्मस्व २१
रूपमुल्लिख्य विषयीकृत्य यो बोधो जायते ब्रह्माहमस्मीति सोभिधायतेऽनेन वाक्येनेत्यर्थः ९६

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ननु तर्हि पूर्वोक्तरीत्या सकृद्वाक्यविचारादेवापरोक्षज्ञानसिद्धेरावृत्तिरसकृदुपदेशादित्यादौ विहितं श्रवणाद्याव
र्त्तनमननुष्ठेयं स्यादित्याशंक्य ज्ञानदार्ढ्याय तदावर्त्तनानुष्ठानस्याचार्यैरभिहितत्वादनुष्ठेयमेवेत्याह अस्त्विति

अस्त्वबोधोपरोक्षोत्र महावाक्यात्तथाप्यसौ
न दृढः श्रवणादीनामाचार्यैः पुनरारणात् ९७

अत्र ब्रह्मात्मनि विषये महावाक्यात्सकृच्छ्रुताद्विचारसहितादपरोक्षबोधोस्तु भवत्येव तथापि नासौ दृढोतः श्रव
णाद्यावर्त्तनीयं श्रीमच्छंकराचार्यैः पुनर्वाक्यार्थज्ञानोत्पत्त्यनंतरमपि श्रवणाद्यावर्त्तनाभिधानादित्यर्थः ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

न॰सिदीप॰ ज्ञानदार्ढ्याय तस्य धीर्लभ्यते ९७ आचार्यैः केन वाक्येनाभिहितमित्याशंक्य तद्वाक्यं पठति अहमिति ९८ ननु वाक्य
३२ प्रमाणजनितस्य ज्ञानस्य दार्ढ्यं कुत इत्याशंक्याह बाढमिति हि यस्मात्कारणाच्छ्रुत्यनेकताश्रुता नानानात्वंऽएको

अहं ब्रह्मेति वाक्यार्थबोधो यावद्दृढो भवेत् शमादिसहितस्तावदभ्यसेच्छ्रवणादिकं ९८
बाढं संति त्वदार्ढ्यस्य हेतवः श्रुत्यनेकता असंभाव्यत्वमर्थस्य विपरीता च भावना ९९

हेतुः अर्थस्याखंडैकरसस्याद्वितीयब्रह्मरूपस्यालौकिकत्वेनासंभावितत्वमपरः विपरीतभावना पुनः कर्तृत्वाद्य ३२
भिमानरूपा इतरा इत्येवंविधो अदार्ढ्यस्य हेतवो बाढं संति सर्वथा विघ्नेऽतोऽपरोक्षानुभवदार्ढ्याय श्रवणा
दिकमावर्तनीयमिति भावः ९९

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

एवंत्रिविधानदार्ढ्यस्यहेतुनुपन्यस्यश्रुतिनानात्वमयुक्तादार्ढ्यं निवर्तयेश्रवणावृत्तिः कर्त्तव्याइत्याह शाखा
भे दादिति यथाशाखाभेदात्कर्मभेदः श्रूयतेबह्वृचैर्वहौत्रंक्रियतेयजुषाध्वर्यवंसाम्नोद्गीथमिति यथावाका

शाखाभेदात्कामभेदाच्छ्रुतंकर्मान्यथान्यथा एवमत्रापिमाशंकीत्यतःश्रवणमाचरेत् २००
वेदांतानामशेषाणामादिमध्यावसानतः ब्रह्मात्मन्येवतात्पर्यमितिधीःश्रवणंभवेत् १

मभेदात्कारीर्यावृष्टिकामोयजेतश्येनेनाभिचरन्यजेत कामभेदात्कर्मभेदः श्रुतएवमुपनिषत्स्वपिमतिर्माभूदत
स्तस्यभेदशंकायांतन्निवारणायश्रवणंपुनःपुनःकर्त्तव्यमित्यर्थः २०० श्रीरामायनमः ॥ ॥

65

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

न्तिदीप० किंत छ्रवणमित्याकांक्षायांतल्लक्षणमाह वेदांतानामिति सर्वासामप्युपनिषदामुपक्रमोपसंहारादिपर्यालो
२२ चनायांब्रह्मरूपेप्रत्यगात्मन्येवतात्पर्येणपर्यवसानमित्येवंरूपोनिश्चयः श्रवणमित्यर्थः १ एवंविधंश्रव
णंकुत्रनिरूपितमित्यतआह समन्वयाध्यायइतिएतछ्रवणंसमन्वयाध्यायेसुव्यक्तंव्यासादिभिरितिशेषः

समन्वयाध्यायएतत्स्यादुक्तंधीस्वास्थ्यकारिभिः तर्कैःसंभावनार्थस्यद्वितीयाध्यायईरिता २

अर्थासंभावनानिवृत्तिहेतुः मननंतुद्वितीयाध्यायेनिरूपितमित्याह धीस्वास्थ्येति प्रमेयगतानुपपत्तिपरि २२
हार - रूपाद्बुद्धिस्वास्थ्यकारिभिस्तर्कैर्युक्तिशब्दाभिधेयैरर्थस्यसंभावनासंभावितत्वानुसंधानमननंद्विती
याध्यायेनिरूपितमित्यर्थः २

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

इदानीं विपरीतभावनातन्निवृत्त्युपायं च दर्शयति बहुजन्मेति ३ विपरीतभावनानिवर्तकं यदेकाग्र्यं तत्कुतो
जायत इत्याशंक्याह तत्त्वेति एतदेकाग्र्यं तत्त्वोपदेशात्प्रागेव सगुणब्रह्मोपासनाद्भवतीत्यर्थः ४ ननु

बहुजन्मदृढाभ्यासाद्देहादिष्वात्मधीः क्षणात् पुनः पुनरुदेत्येवं जगत्सत्यत्वधीरपि ३
विपरीता भावनेयमैकाग्र्यात्सा निवर्तते तत्त्वोपदेशात्प्रागेव भवत्येतदुपासनात् ४
उपास्तयोऽत एवात्र ब्रह्मशास्त्रेऽपि चिंतिताः प्रागनभ्यासिनः पश्चाद्ब्रह्माभ्यासेन तद्भवेत् ५

तत्कुतोऽवगम्यत इत्याशंक्य उपासनाविचारस्य वेदांतशास्त्रे कृतत्वादित्याह उपास्तय इति अकृतोपास्ति
कस्य कुतस्तज्जन्मेत्यत आह प्रागिति ५ ॥श्रीरामायनमः॥ श्रीरामचंद्रायनमः॥ ॥श्री॥ ॥

67

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तृप्तिदी॰प॰ ब्रह्माभ्यासस्तु कीदृश इत्याकांक्षायामाह तच्चिंतनमिति ८ एतदेकपरत्वं विशदयितुं श्रुतिमाह तमेवेति धीरः ब्र

३४ ह्मचर्यादिसाधनसंपन्नः ब्राह्मणः ब्रह्मभवितुमिच्छुः मुमुक्षुः तमेवमसस्वरूपं परमात्मानमेव विज्ञाय संशयाद्यभावो

तच्चिंतनं तत्कथनमन्योन्यं तत्प्रबोधनं एतदेकपरत्वं च ब्रह्माभ्यासं विदुर्बुधाः ८ तमे
व धीरो विज्ञाय प्रज्ञां कुर्वीत ब्राह्मणः नानुध्यायाद्बहूञ्छब्दान्वाचो विग्लापनं हि तत् ९

यथा भवति तथा ज्ञात्वा प्रज्ञां ब्रह्मात्मैकत्वज्ञानसंततिरूपमेकाग्र्यं कुर्वीत संपादयेत् अनात्मगोचरान्बहूञ्छ ३४
ब्दान्नानुध्यायेत् न स्मरेत् ध्यानेनाभिधानमप्युपलक्ष्यते नाभिदध्यात् अन्यथा शब्दध्यानेन वाग्विग्लापनात्तु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तआह। वाच इति हि यस्मात्तदभिधानमनेन स्मरणमप्युपलक्ष्यते वाच इति मनसोऽप्युपलक्षणं विग्लापनं विग्लापयतीति विग्लापनं श्रमहेतुः अयमभिप्रायः इतरशब्दानुसंधानेन मनसः श्रमो भवति तदभिधाने तु वाच इति॥ ७ एवमैकाग्र्यमतिपादिकांश्च तिसृभिर्धायस्य निमप्याह अनन्या इति येजनाः अनन्याः अहं ब्रह्मास्मीति ज्ञाने

अनन्याश्चिंतयंतो मां येजनाः पर्युपासते तेषां नित्याभियुक्तानां योगक्षेमं वहाम्यहं ८

नमदभिन्नाः संतः तथैव मां चिंतयंतः पर्युपासते परितः सर्वेष्वपि कालेषु उपासते मद्रूपा एव वर्त्तंते नित्याभियुक्तानां सदा मच्चित्तानां तेषामहं तादात्म्यत्वेन अनुसंधीयमानो हं योगक्षेममलब्धस्य लाभलब्धपरिरक्षणरूपौ योगक्षेमौ वहामि संपादयामीत्यर्थः ८

69

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त.चि.दी.प. उदाहृतयोः श्रुतिस्मृत्योस्तात्पर्यमाह इतीति एते श्रुतिस्मृती विपरीतभावनानिवृत्तये आत्मनि सदा चित्तैकाग्र्यम्
२५ निपादयत इत्यर्थः ९ ननु देहाद्यात्मत्वबुद्धेर्जगत्सत्यत्वबुद्धेश्च कुतो विपरीतभावनात्वमित्याशंक्य तल्लक्षणयोगादि

इति श्रुतिस्मृती नित्यमात्मन्येकाग्रतां धियः विधत्तो विपरीताया भावनायाः क्षयाय हि ९
यद्यथा वर्त्तते तस्य तत्त्वं हित्वान्यथात्वधीः विपरीतभावना स्यात्पित्रादावरिधीर्यथा १०

निदर्शयितुं तस्या लक्षणमाह यद्यथेति यद्वस्तु शुक्त्यादि यथा येन शुक्त्यादिरूपेण वर्त्तते तस्य तत्त्वं शुक्त्यादिरूप २५
त्वं परित्यज्य अन्यथात्वस्य रजतादिरूपत्वस्य धीर्ज्ञानं विपरीतभावना स्यात् अतस्मिंस्तद्बुद्धिरिति यावत् तामुदाह
रति पित्रादाविति १०

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

उक्तलक्षणं प्रकृते योजयति आत्मेति अयमात्मा वस्तुतो देहादिभ्यो भिन्नः इदं जगच्च मिथ्या एवं सत्यपि तयोरा
त्मजगतोर्यथाक्रमं देहादिरूपत्वबुद्धिः सत्यत्वबुद्धिश्च या सा विपरीतभावनेत्यर्थः २१ पूर्वमैकाग्र्यात्सा निवर्त्त
ते इति सामान्येनोक्तमर्थं विशेषाकारेणाह तत्वभावनयेति सा देहाद्यात्मत्वजगत्सत्यत्वधीरूपा विप

आत्मा देहादिभिन्नोयं मिथ्या चेदं जगत्तयोः देहाद्यात्मत्वसत्यत्वधीर्विपर्ययभावना २१
तत्वभावनया नश्येत्सातो देहादिरिक्ततां आत्मनो भावयेन्नित्यं मिथ्यात्वं जगतोनिशं २२

रीतभावना तत्वभावनया आत्मनो देहातिरिक्तत्वस्य जगतो मिथ्यात्वस्य च भावनया निरंतरध्यानेन नश्येद
त आत्मनो देहघरिक्तत्वं देहादेर्जगतो मिथ्यात्वं च सदा भावयेदित्युक्तं २२ ॥श्रीरामचंद्रायनमः॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

 तत्र जपादाविव नियमापेक्षाऽस्ति वा न वेति पृच्छति किमिति आत्मभेदधीः आत्मनो देहादिभ्यो विभिन्नत्वा
 नं जगतो मिथ्यात्वानुसंधानं च मन्त्रजपदेवताध्यानादिवत् किं नियमेनानुष्ठातव्यं उत लौकिकव्यवहारवत्।
नियममन्तरेणापि कर्तुं शक्यत इति १३ दृष्टफलत्वान्नात्र नियमः कश्चिदस्तीत्याह अन्यथेति अन्यथा

किं मन्त्रजपवन्मूर्तेर्ध्यानवच्चात्मभेदधीः जगन्मिथ्यात्वधीश्चात्राऽऽवर्त्याऽऽस्यादुतान्यथा
१३ अन्यथेति विजानीहि दृष्टार्थत्वेन भुक्तिवत् बुभुक्षुर्जपवद्भुङ्क्ते न कश्चिन्नियमः क्वचित् १४

नियमं विनेत्यर्थः तत्र हेतुमाह दृष्टार्थत्वेनेति तत्र दृष्टान्तमाह भुक्तिवदिति दृष्टार्थे हि भोजने नियमाः
क्व नियमस्योपलम्भं त इत्याशंक्याह बुभुक्षुरिति क्षुदपनयनाय भोक्तुमिच्छन् पुरुषो जपं कुर्वाण इव न
नियमेन भुङ्क्ते अपि तु यथा क्षुद्बाधोपशान्तिः स्यात् तथा भोजनं करोतीत्यर्थः १४ ॥श्री॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

एतदेव प्रपंचयति अश्नाति वान्नेसति कदाचिद्भुंक्ते न वाश्नाति तस्मिन्नसति क्षुद्बाधाविस्मारकं घृतादि चेष्टया
न श्नन्नेव कालं नयति अन्यथा वा तिष्ठन् गच्छन् शयानो वा स्वेच्छया भुंक्ते एवं येन केन प्रकारेण तात्कालिकीं

अश्नाति वा न वाश्नाति भुंक्ते वा स्वेच्छयान्यथा येन केन प्रकारेण क्षुधामपनिनीषति १५
नियमेन तपः कुर्याद्द्रुतौ मत्स्यवायतः अन्यथाकरणेनर्थः स्वरवर्णविपर्ययात् १६

क्षुद्बाधामपनेतुमिच्छति अयमभिप्रायः क्षुद्बाधानिवृत्तिलक्षणदृष्टफलाय भोजनमेव कार्यं नियमात्स्वप
रलोकहेतवइति १५ जपादौ भोजनादौ लक्षणं प्रदर्श्य तन्नियमेनेति तत्र हेतुमाह ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

न सि दी प० अकृतावितिभवत्वेवमकरणेप्रत्यवायोन्यथाकरणेतुसनास्तीत्याशंक्याह अन्यथेति मंत्रोहीनः स्वरतोवर्णतोवा
२७ मिथ्याप्रयुक्तोनतमर्थमाह सवाग्वज्रोयजमानंहिनस्तियथेंद्रशत्रुःस्वरतोपराधात् इत्युक्तत्वादितिभावः१६

क्षुधेवदृष्टबाधाहृद्विपरीताचभावना जैयाकेनाप्युपायेनत्वस्त्रानुष्ठितेःक्रम १७

ननुक्षुद्बाधायाः दृष्टबाधाहेतुत्वात्तन्निवृत्तयेनियमेनापिभोक्तव्यमेवविपरीतभावनायास्तुतथात्वाभावात्तन्नि
वृत्तकेध्यानमदृष्टफलायनियमेनानुष्ठेयमित्याशंक्याह क्षुधेवेति विपरितभावनायाःदुःखहेतुत्वस्यानुभवसिद्धेरितिभावः १७

74

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तर्हि स उपायः प्रदर्शनीयः इत्याशंक्य पूर्वमेव प्रदर्शित इत्याह उपाय इति ननु जपवत्प्राङ्मुखत्वादिनियमो माभू-
त्ध्यानवदेकपरत्वलक्षणैकाग्रतानिर्बन्धोस्त्वित्याशंक्याह एतदिति १८ ननु ध्यानस्य ध्येयचिंतामात्रकत्वात्त

उपायः पूर्वमेवोक्तस्तच्चिंताकथनादिकः एतदेकपरत्वेपि निर्बन्धो ध्यानवन्न हि १८
मूर्त्तिमत्प्रत्ययसांतत्यमन्यानंतरितं धियः ध्यानं तत्रास्ति निर्बन्धो मनसश्चंचलात्मनः १९

अत्रैको निर्बन्ध इत्याशंक्य ध्याने निर्बन्धं दर्शयितुं ध्यानस्वरूपं तावदाह मूर्त्तीति धियः बुद्धेः संबंधिनां मूर्त्तिमत्प्र-
त्ययानां देवतादिमूर्त्तिगोचराणां प्रत्ययानां यत्सांतत्यमविच्छिन्नतया वर्त्तमानत्वं तदन्यानंतरितमन्ये ॥ ॥

75

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त॰ नि॰ दी॰ पृ॰ नविजातीयप्रत्ययेनाव्यवहितं तत्तद्ध्यानं इत्युच्यते एवं ध्यानस्वरूपं निरूप्य तत्र निर्बंधं दर्शयति तत्रेति सदा
३८ पर्यटनशीलस्य करितुरगादेरेकत्र स्तंभादौ बंधने यथोपरोधस्तद्वदिति भावः १९ मनसश्चांचल्यादौ गीतावाक्यं

चंचलं हि मनः कृष्ण प्रमाथि बलवद्दृढं ॥
तस्याहं निग्रहं मन्ये वायोरिव सुदुष्करं २०

टीका प्रमाणयति चंचलं हि मन इति प्रमाथि प्रमथनं पुरुषस्य व्याकुलत्वकारणं बलवत् समर्थं अनिवार्यमित्यर्थः। ३८
दृढं सत्यसति वा विषयलग्नं तत उद्धर्तुमशक्यमित्यर्थः अतस्तस्य मनसो निग्रहो वायोर्निग्रह इव सुदुष्करः २०

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मनसो दुर्निग्रहत्वे वासिष्ठवाक्यमपि प्रमाणयति अप्यब्धिपानादिति २१ महतेन तो वैषम्यं दर्शयति क
थनादाविति शंखल्ला बद्धदेहस्य यथा निर्बंधो न तथा कथनादावित्यर्थः आदिशब्देन तच्चिंतनादिकं ग्राह्य

अप्यब्धिपानान्महतः सुमेरून्मूलनादपि अपि वह्न्यशनात्साधो विषमश्चित्तनिग्रहः २१ कथ
नादौ न निर्बंधः शृंखलाबद्धदेहवत् किं त्वनंतेतिहासाद्यैर्विनोदो नाद्यावद्धियः २२

के ते नैवलं निर्बंधाभावः प्रत्युत धियो विनोदहेतुत्वात् किं त्विति इतिहासः पूर्वप्रोक्तकथा आद्या येषां लौकिककथा
नुकूलयुक्तिदृष्टांतप्रदर्शनादीनां ते ऽसंख्याता अनंताश्च ॥ श्री रामाय नमः ॥ श्री रामचंद्राय नमः ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तृप्तिदीप० तिद्वतिहासाद्यभ्यासेऽनंते तिहासाद्यासेऽर्थो बुद्धिविनोदः क्रीडा विशेषो भवति तत्र दृष्टांतः नाट्यवदिति तत्त्वस्मृ
३९ यानिरीक्षणमित्यर्थः २२ ननु कथादिभिरप्येतदेकपरत्वविघातः स्यादित्याह चिदेवेति इतिहासादीनामात्मा

चिदेवात्मा जगन्मिथ्येत्यत्र पर्यवसानतः निदिध्यासनविक्षेपो नेतिहासादिभिर्भवेत् २३
कृषिवाणिज्यसेवादौ काव्यतर्कादिकेषु च विक्षिप्यते प्रवृत्ता धीस्तैस्तत्त्वस्मृत्यसंभवात् २४

चिन्मात्ररूपो न देहादिरूपः जगच्च मिथ्येत्येतस्मिन्नर्थे पर्यवसानात्तैरेतदेकपरत्वशब्दाभिधेयस्य निदिध्या ३९
सनस्य विक्षेप इत्यर्थः २३ नन्वितिहासादीनामंगीकारे कृष्यादेरपि प्रसक्तिः स्यादित्याशंक्याह कृषीति २४

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

क्षुध्यादीनां तत्वानुसंधानविघातित्वेन साम्यत्वे भोजनादेरपि तथात्वात्तदपि साम्यमेवेत्याशंक्याह अनुसंदधतै
वेति कुत इत्यत आह असंतेति विक्षेपाभावोपि कुत इत्यत आह आसुप्तेः पुनः स्मृतेरिति २५ ननु तदानीं विक्षेपा

अनुसंदधतैवात्र भोजनादौ प्रवर्तितुं शक्यते संतविक्षेपाभावादासुप्तेः पुनः स्मृतेः २५ न तत्त्ववि
स्मृतिमात्रान्नानर्थः किंतु विपर्ययात् विपर्येतु न कालोस्ति ज्ञप्तिरस्मरतः क्वचित् २६

भावेपि तत्त्वविस्मृतिसद्भावात्पुरुषार्थहानिः स्यादित्याशंक्याह न तत्वेति कुतस्तर्ह्यनर्थ इत्यत आह किंत्विति॥
विस्मरणे सति विपर्ययोपि स्यादित्याशंक्याह विपर्येत्विति २६

79

तत्त्वदी०प० ननुभोजनादिषुप्रवृत्तस्यैवतर्काद्यभ्यासप्रवृत्तस्यापितत्व स्मरणंकिंनस्यादित्याशंक्याह तत्वस्मृतेरिति॥न
४० केवलंतत्वानुसंधानावसराभावएवकिंतुकाव्यतर्काद्यभ्यासस्यतत्वाभ्यासविरोधित्वात्तदानींस्मृतमपि

तत्वस्मृतेरवसरो नास्त्यन्याभ्यासशालिनः॥
प्रत्युताभ्यासघातित्वाद्बलात्तत्वमुपेक्ष्यते २७

तत्वंबलादुपेक्षतइत्याह प्रत्युतेति २७ ॥श्री॥ ॥श्रीरामायनम॥श्रीरामचंद्रायनम॥ ॥ ४०

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तत्वानुसंधाने विरोधिवाग्व्यवहारस्य त्याज्यत्वे प्रमाणत्वेन तमेवैकं जानथ आत्मानमन्यावाचोविमुंचथ अमृत
स्यै षसेतुरितिश्रुतिवाक्यसमर्थितः पठति तमेवैकमिति नानुध्यायान्बहून् शब्दान्वाचोविग्लापनं हितत्

तमेवैकं विजानीथ त्यन्यावाचोविमुंचथ इतिश्रुतं तथान्यत्रवाचोविग्लापनंत्विति २८
आहारादित्यजन्नैवजीवेच्छास्त्रांतरं त्यजन् किंनजीवसियेनैवंकरोष्यत्रदुराग्रहं २९

त इत्येतत्श्रुतिवाक्यं संभूयइत्याह इतिश्रुतमिति २८ ननुतत्वानुसंधानातिरिक्तं आहारादि यथा न त्यज्यते एवमि
तरशास्त्राद्यभ्यासोपि क्रियतामिसाग्रहं कुर्वाणं प्रत्याह आहारादीति २२ श्रीरामायनमः॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तृप्तिदी ५० ननु तर्हि जनकादीनां तत्त्वविदां कथं राज्यपरिपालनादौ प्रवृत्तिरिति शंकते जनकादेरिति दृढापरोक्षज्ञानित्वा
४१ त्तेषां सा न बाधिकाइत्यभिप्रायेण परिहरति दृढेति तर्हि ममापि दृढबोधोस्त्वीति वदंतं प्रत्याह तथेति ३०

जनकादेः कथं राज्यमिति चेद्दृढबोधतः तथा तवापि चेत्तर्कं पठ यद्वा कृषिं कुरु ३० मिथ्यात्व
वासनादार्ढ्ये प्रारब्धक्षयकांक्षया अक्लिश्यंतः प्रवर्तंते स्वस्वकर्मानुसारतः ३१

॥ ननु तत्त्वविदः संसारासारतां जानंतः कुतस्तत्र प्रवर्तिष्यंत इत्याशंक्य प्रारब्धस्यावश्यंभाविफलत्वाद्भोगेन तत्क्षयाय प्रवृत्तिरि ४१
त्याह मिथ्यात्वेति ३१

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तत्र्धेनाचारेपिप्रवृत्तिःस्यादित्याशंक्याह अतिप्रसंगइति प्रारब्धवशादेवातिप्रसंगोपिस्यादित्याशंक्यांगीकरो
ति अस्त्वेवेति ३२ ननुज्ञान्यज्ञानिनोः प्रारब्धकर्मरूपवस्तुभोक्तव्यत्वयासमानेतयोःकुतोवैलक्षण्यमसि।

अतिप्रसंगोमाशंक्यः स्वकर्मवशवर्त्तिनां अस्त्वनाकेनशक्येतकर्मवारयितुंवद ३३ ज्ञा
निनोज्ञानिनश्चात्रसमेप्रारब्धकर्मणि नक्लेशोज्ञानिनोधैर्यान्मूढःक्लिश्यत्यधैर्यतः
३४ मार्गेगंत्रोर्द्वयोःश्रांतौसमायामप्यदूरतां जानन्धैर्याद्द्रुतंगच्छेदन्यस्तिष्ठतिदी

द्विरित्याशंक्याह ज्ञानिनइति ३३ तत्रदृष्टांतमाह मार्गइति ३४ ॥श्रीरामायनमः॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नृसिंहदीप० इत्थमुपपादितमात्मानं चेदितिमंत्रस्य पूर्वार्धार्थमनुवदन्फलप्रदर्शनपरंउत्तरार्धमवतारयति साक्षादिति स
४२ म्यक्साक्षात्कृतात्मधीः साक्षात्कृतः आत्मा ययासासाक्षात्कृतात्मा तादृशी धीर्यस्य स साक्षात्कृतात्मधीः अवि

साक्षात्कृतात्मधीः सम्यगविपर्ययबाधितः ॥
किमिच्छन्कस्य कामाय शरीरमनुसंज्वरेत् ३५

पर्ययबाधितः विपर्ययेण देहाद्यात्मत्वबुध्या बाधितो न भवतीत्यविपर्ययबाधितः उभयं हेतुगर्भविशेषणं ३५ ४२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अस्यमंत्रार्थस्यतात्पर्यमाह जगदिति काम्यंचकामुकश्च काम्यकामुकौ तावाक्षिप्तौ निरस्तौ तन्निराकरणेका
रणमाह जगन्मिथ्यात्वेति॥ ततः किंमित्यतआह तयोरिति तयोः काम्यकामुकयोरभावेसंतापः कामनानि

जगन्मिथ्यात्वधीभावादाक्षिप्तौकाम्यकामुकौ तयोरभावेसंतापः शाम्येन्निःस्नेहदीपवत्: ३६
गंधर्वपत्तने किंचिन्नैंद्रजालिकनिर्मितं जानन्कामयते किंतु जिहासतिहसन्निदं ३७

मित्तकःकारणाभावान्निःस्नेहदीपवत्शाम्येदित्यर्थः ३६ काम्याभावात्कामनाभावः कुतइत्यत्राशंक्याहगं
धर्वपत्तनइति मायानिर्मितेपत्तनेस्थितंवस्तु किंचिदपिइदमैंद्रजालिकनिर्मि॥ श्रीरामायनम॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नमिदी पु० नमितिजानन्नकामयते नकेवलंकामनाभावः मत्स्कृत इदमनृतमितितत्सन् जिहासतिपरित्यक्तुमिच्छति ३७
४३ दार्ष्टांतिकेयोजयति आपातरमणीयेष्विति॥ एवमापातरमणीयेषुमतीतमात्ररम्येषुभोगेषुभुज्यंत इतिभोगाः

आपातरमणीयेषुभोगेष्वेवंविचारवान्॥
नानुरज्यतिकिंत्वेतान्दोषदृष्ट्याजिहासति ३८

विषयाः स्रक्चंदनादयस्तेषुएवंविचारवान् आपातरमणीयत्वानुसंधानवान् नानुरज्यति नासक्तिंकरोति किं ४३
तुदोषदर्शनेनैतान्परित्यक्तुमिच्छति ३८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नेकेविषयदोषास्तत आह अर्थानामिति ३९ एवंविषयाणांदुःखहेतुत्वंप्रदर्श्य अशोभनत्वंचक्कचिद्दर्श
यति मांसेति स्नायवः शिराः अस्थीनि प्रसिद्धानि ग्रंथयो मांसनिचयरूपाः नितं स्तनादयः एतैः सहितं
मांसपांचालिकायाः पुत्तलिकायाः योषितो यंत्रलोले यंत्रवच्चलनशीले अंगपंजरे अंगान्येव पंजरं नीडं तस्मि

अर्थानामार्जने क्लेशस्तथैव प्रतिपालने नाशे दुःखं व्यये दुःखं धिगर्थान्क्लेशकारिणः ३९
मांसपांचालिकायास्तु यंत्रलोलेंगपंजरे स्नाय्वस्थिग्रंथिशालिन्याः स्त्रियाः किमिव शोभनं ४०
एवमादिषु रागस्य सुदोषाः सम्यक्प्रपंचिताः विमृशन्ननिशं तानि कथं दुःखेषु मज्जति ४१

न शरीरे किं शोभनमिव न किमपीत्यर्थः ४० एवमादिषु इत्यादिशब्देन त्वङ्मांसरक्तवाष्पांबुपृथक्कृत्वा विलो

वैराग्य[illegible]

87

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तृप्तिदी॰प॰ परिमुत्घसस्यैव मादयोगस्यंते ४१ विषयदोषदर्शने सति भोगेछाभावे युक्तिसदिति तं दृष्टांतमाह क्षुधयेति स्व
४४ यमसृष्टो विवेकी मृष्टान्नभोजनेन ध्वस्ता विनष्टा तृट् तृष्णा आकांक्षा यस्य स तथोक्त इदं विषमित्येवं जानन्न तृ

क्षुधया पीड्यमानोपि न विषं ह्यत्तुमिछति मृष्टान्नध्वस्ततृड् जानन्नामूढस्तज्जिघत्सति ४२
प्रारब्धकर्मप्राबल्याद्भोगेष्विछा भवेद्यदि क्लिश्यन्नेव तदाप्येष भुंक्ते विष्टिगृहीतवत् ४३

हि विषं न जिघत्सति नात्तुमिछतीत्यर्थः ४२ ननु प्रारब्धकर्मणः प्रबलत्वात् ज्ञानिनोपीछा भवेदित्याशंक्य सत्याम ४४
पीछायां भीतिपुरःसरं न भुंक्त इत्याह ॥ प्रारब्धेति ४३ ॥ श्रीरामकृष्णायनमः॥ ॥श्रीरामचंद्रायनमः॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कथमेतदवगम्यत इत्याशंक्य लोकदर्शनादित्याह भुंजाना इति ४४ ननु तत्त्वविदां संसारनिमित्तकस्तापोऽनुपपन्नः ज्ञानवैयर्थ्यापातादित्याशंक्याह नायमिति अयं क्लेशः नाद्यापि कर्म नश्छिन्नमित्येवमनुतापात्मकः

भुंजाना नाऽपि बुधा अश्रद्धावंतः कुटुंबिनः नाद्यापि कर्म नश्छिन्नमिति क्लिश्यंति संततं ४४ ॥
नायं क्लेशोऽत्र संसारतापः किंतु विरक्तता भ्रांतिज्ञाननिदानो हि तापः सांसारिकः स्मृतः ४५

संसारतापो न भवति किंत्वत्र संसारे विरक्तता आसक्तिरहितता तापकत्वाभावे युक्तिमाह भ्रांतीति भ्रांतिज्ञाननिदानः भ्रांतिज्ञानकारणकः स्मृतः पूर्वाचार्यैः अयं तु विवेकज्ञानमूलत्वान्न तथाविध इत्यर्थः ४५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तृप्तिदीप० अयंक्लेशोऽविवेकमूलोऽविवेकमूलोवेनिकुतोवगम्यतइत्याशंक्याकामनिवर्त्तकत्वाद्विवेकमूलइत्याह विवेकेने
७५

विवेके नपरिक्लिश्यन्नल्पभोगेनतृप्यति अन्यथानंतभोगेपि॥
नैवतृप्यतिकर्हिचित् ७६ नजातुकामः कामानामुपभोगेनशा
म्यति हविषाकृष्णवर्त्मैवभूयएवाभिवर्धते ७७

ति ७८ विवेकिनइवाविवेकिनोपिभोगेनैवतृप्तिःस्यादतोविवेकोऽप्रयोजकइत्याशंक्यभोगस्यतृप्तिहेतुत्वाभा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

विवेकमूलस्य भोगस्य तत्त्वमिति तेतुत्वमनुभवसिद्धमित्याह परिज्ञायेति अयं भोगः एतावानेवं प्रयाससाध्य इत्येवमनुभवपूर्वकश्चेदलं बुद्धिस्तेतुष्टिर्दृष्टफलत इत्यर्थः ननु तत्साहेतो भोगस्य विवेकसाहचर्यमात्रेण कथं तुष्टिकरत्व

परिज्ञायोपभुक्तो हि भोगो भवति तुष्टये विज्ञायसेवितश्चोरो मैत्रीमेति न चोरतां ४८

मित्याशंक्य सत्कारिविशेषवशाद्विपरीतकार्यकारित्वं लोके दृष्टमित्याह विज्ञायेति अयं चोर इति ज्ञात्वा तेन सत्यवर्त्तमानस्य पुरुषस्य न चोरो भवति॥ किंतु मित्रतामेतीत्यर्थः ४८ ॥श्रीरामायनमः॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तृप्तिदी० प० ननु कामनास्वरसत्वान्मनसः कथं स्वल्पभोगेन तृप्तिः स्यादित्याशंक्य निदिध्यासनेन निगृहीतस्य तथात्वाद्भवत्ये
४६ व तृप्तिरित्याह मनस इति निगृहीतस्य योगाभ्यासेन वशीकृतस्य मनसः अल्पकोऽपि स्वल्पोऽपि लीलाभोगो ली

मनसो निगृहीतस्य लीलाभोगोऽल्पकोऽपि यः ॥ तमेवालब्धविस्तारं क्लिष्टत्वाद्बहु मन्यते ४९
बंधमुक्तो महीपालो ग्राममात्रेण तुष्यति परैर्न बद्धो नाक्रांतो न राष्ट्रं बहु मन्यते ५० ॥

लानुभवो योऽस्ति अलब्धविस्तारमप्राप्तबाहुल्यं तमेव भोगं क्लिष्टत्वाद्दोषयुक्तत्वाद्बहु मन्यतेऽधिकत्वेन जानातीत्य ४५
र्थः ४९ निगृहीतस्य मनसः स्वल्पेनापि भोगेन तृप्तिर्भवतीत्यत्र दृष्टान्तमाह बंधमुक्त इति ५०

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ननु प्रारब्धकर्मप्राबल्याद्भोगेष्विच्छा भवेद्यदीत्यत्र कर्मवशादिच्छा भवेदित्युक्तं तदनुपपन्नमिच्छाविघातिनि विवे
कज्ञाने सति तदुत्पत्त्यसंभवादिति शंकते विवेक इति ५१ दोषदर्शने सत्यपि इच्छाजन्मसंभविष्यति प्रारब्धस्य ना

विवेके जाग्रति सति दोषदर्शनलक्षणे कथमारब्धकर्मापि भोगेच्छां जनयिष्यति ५१ नैष दो
षो यतोऽनेकविधं प्रारब्धमीक्ष्यते इच्छानिच्छापरेच्छा च प्रारब्धं त्रिविधं स्मृतं ५२ अपथ्य
सेविनश्चोरा राजदाररता अपि जानंत एव स्वानर्थमिच्छंत्यारब्धकर्मतः ५३ ॥ श्री ॥

नाप्रकारत्वादिति परिहरति नैष दोष इति नानाप्रकारत्वमेव दर्शयति इच्छाजनकमनिच्छया भोगप्रदं परेच्छया
भोगप्रदं चेति त्रिविधमित्यर्थः ५२ इच्छाप्रारब्धं दर्शयति अपथ्यसेविन इति ५३ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

न सिद्धा प० अपथ्यसेवादौ छायाः प्रारब्धफलत्वं कुतो वैम्मत इत्याशंक्य अपरिहार्यत्वादि सभिप्रेत्यात न चात्रैतदिति अत्रास्मि
४७ लोके ऽपथ्यादौ छंदीत्येतत्कृत उच्यते इत्यत आह यत इति ५४ गीतावाक्यं पठति सदृशमिति विवेकज्ञानवा

न चात्रैतद्वारयितुमीश्वरेणापि शक्यते यत ईश्वर एवाह गीतायामर्जुनं प्रति ५४ सदृशं चे
ष्टते स्वस्याः प्रकृतेर्ज्ञानवानपि प्रकृतिं यांति भूतानि निग्रहः किं करिष्यति ५५

नपि पुरुषः स्वस्याः स्वकीयायाः प्रकृतेः सदृशं अनुरूपं चेष्टते प्रकृतिर्नाम पूर्वकृत धर्माधर्मादिसंस्कारो वर्त्त
मानजन्मादावभिव्यक्तः किं पुनर्मूर्खस्तस्मात्प्रकृतिं यांति भूतानि निग्रहः प्रवृत्तिनिवृत्त्योर्निरोधः मयाऽ ४७
न्येन वा कृतः किं करिष्यति न किमपीत्यर्थः ५५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तीव्रमारब्धस्यापरिहार्यत्वेवचनांतरसंमतिमाह अवश्यमिति अवश्यंभाविभावानांदुःखादीनामित्यर्थः ५६
मारब्धस्यापरिहार्यत्वेनतत्परिहारासमर्थत्वेश्वरस्यानीश्वरत्वप्रसंग इत्याशंक्याह नचेति कुत इत्यत आह

अवश्यंभाविभावानांप्रतीकारोभवेद्यदि तदादुःखैर्नलिप्येरन्नलरामयुधिष्ठिराः ५६
नचेश्वरत्वमीशस्यहीयतेतावतायतः अवश्यंभावितात्वेषामीश्वरेणैवनिर्मिता ५७

यत इति यतःकारणादेषांदुःखादीनामवश्यंभावितापीश्वरेणैवनिर्मिता तोनानीश्वरत्वप्रसंग इत्यर्थः ५७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तत्त्वदीप० एवं सम्यक्पंचमिच्छाप्रारब्धमभिधाय अनिच्छाप्रारब्धं वक्तुमारभते प्रश्नोत्तराभ्यामिति अनिच्छापूर्वकं च प्रार
४८ ब्धमस्तीत्येतदर्जुनकृष्णयोः प्रश्नोत्तराभ्यामेवावगम्यते ज्ञायत इति योजना तदभिधानाय शिष्यमभिमु

प्रश्नोत्तराभ्यामेवैतद्गम्यतेऽर्जुनकृष्णयोः अनिच्छापूर्वकं चास्ति प्रारब्धमिति तच्छृणु ५८
अथ केन प्रयुक्तोऽयं पापं चरति पूरुषः अनिच्छन्नपि वार्ष्णेय बलादिव नियोजितः ५९

स्वीकरोति तच्छृण्विति ५८ तत्रार्जुनस्य प्रश्नं तावद्दर्शयति अथ केनेति हे वार्ष्णेय वृष्णिसंबंधिन् अयं ४८
पुरुषः केन प्रयुक्तः प्रेरितः अनिच्छन्नपि इच्छामकुर्वन्नपि राज्ञा बलान्नियोजित इव पापं चरति आचर ९८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

हस्य सोत्तरमाह काम एष इति एषः पुरुषप्रवर्त्तकः रजोगुणात्समुद्भवः उत्पत्तिर्यस्य सः रजोगुणसमुद्भवः का
म एषः प्रसिद्धोयं कामः कदाचित्क्रोधरूपेणापि परिणमते ततः क्रोधः स पुनः कीदृशः महाशनः महत् अशन
ं विषयजातं यस्य सः महाशनः महापाप्मा महत् पापं यस्मात् तेनु त्वादुपचारात् महापाप्मत्वमस्य अत इह संसा

काम एष क्रोध एष रजोगुणसमुद्भवः महाशनो महापाप्मा विद्ध्येनमिह वैरिणं ६०

रे एनं कामं क्रोधरूपिणं वैरिणं विद्धि अयमभिप्रायः प्रारब्धवशादुद्रिक्तरजोगुणकार्ययोः कामक्रोधयोरन्त
तरस्यैव पुरुषप्रवर्त्तकत्वेन प्रवृत्तिरिच्छाया इति ६०

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तत्त्वदीप० ननुअत्रकामक्रोधयोरेवपुरुषप्रवर्त्तकत्वमुपलभ्यते नानिच्छाप्रारब्धस्येत्याशंक्य तस्यैवप्रवर्त्तकत्वमति पाद

५९ कं तद्वाक्यं पठति स्वभावजेनेति हेकौंतेय निबद्धः स्वेनैवअनुष्ठितेनात एव स्वकीयेन प्रारब्धेन कर्मणा।

स्वभावजेन कौंतेय निबद्धः स्वेन कर्मणा कर्तुं नेच्छसि यन्मोहात्करिष्यस्यवशोपि तत् ६१

निबद्धः सन् यत्कर्तुं नेच्छसि तदपि मोहाद् विवेकतः अवशः परवशः करिष्यसि अतो नानिच्छाप्रारब्धमस्ती
सम्प्रुपगंतव्यमिति भावः ६१

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

इदानीं परेच्छाप्रारब्धमप्यस्तीत्याह नानिच्छंत इति अनिच्छंतोपि न भवंति इच्छंतोपि न भवंति किंतु परदाक्षि
ण्यसंयुताः संतस्तत्तस्यार्थमेव सुखदुःखे अनुभवंति अतस्तत्सुखादीनां इह हेतुभूतं परेच्छापूर्वकमा

नानिच्छंतो न चेच्छंतः परदाक्षिण्यसंयुताः सुखदुःखे भजंत्येतत्परेच्छापूर्वकमीरितं ६२ कथं
तर्हि किमिच्छन्निति स्वेच्छा निषिध्यते नेच्छानिषेधः किंत्विच्छाबाधो भर्जितबीजवत् ६३

रब्धं प्रसिद्धमित्यर्थः अत एव दोषदर्शनेसत्यपि प्रारब्धस्य परिहार्यत्वान्न स्वेच्छाजनकत्वं न निवारयितुं शक्नोतीति भा
वः ननु तत्त्वविदोपि क्वचित्कारे किमिच्छन्निति विरोध इति शंकते ॥ कथमिति ॥ श्रीरामाय नमः ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

न्तिदी प०
५०

किमिच्छन्निस्मनेनवाक्येनकथमिच्छाभावोवर्णितइत्यर्थः नानेनेच्छाभावोभिधीयते किंतुसत्ताअर्पितसाः स
मर्थमप्रवृत्तिजनकत्वंनास्तीतिबोध्यतइतिपरिहरति नेच्छेति ६२ स्वरूपेणसत्ताअर्पितसाः सामर्थ्यरहिते

भर्जितानितुबीजानिसंतिस्मकार्यकराणिच विद्वदिच्छातथेष्यासत्त्वबोधान्नकार्यकृत् ६४

दृष्टांतमाह भर्जितेति ६२ संक्षेपेणोक्तमर्थंप्रपंचयति भर्जितानीति यथा भर्जितानि स्वयंस्वरूपेणविद्यमानान्य
पिनांकुरादिकार्यकराणि भवंति तथा विद्वदिच्छा स्वयंविद्यमानापि दृश्यमाणपदार्थस्यासत्त्वज्ञानेनबाधितत्वान्न

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ननु तर्हि विदुष इच्छेव नांगीकर्त्तव्या फलाभावादित्याशंक्य फलाभावोऽसिद्धो भोगलक्षणफलसद्भावादिति सदृष्टांतमाह दग्धबीजमिति दग्धं भर्जितमित्यियावत् व्यसनं विपदादिरूपं वह विध्वंसनं विपदित्रं शे दोषे कामजकोपजे इत्यभिधानात् ६५ ननु कर्मैव भोगद्वारा व्यसनमपि जनयेदित्याशंक्याह भोगेनेति प्रारब्धकर्म

दग्धबीजमरोहेऽपि भक्षणायोपयुज्यते विद्वदिच्छाप्यल्पभोगं कुर्यान्न व्यसनं वह ६५ भोगेन चरितार्थत्वात्प्रारब्धं कर्म हीयते भोक्तव्यसत्यता भ्रांत्या व्यसनं तत्र जायते ६६ माविनश्यत्वयं भोगो वर्धतामुत्तरो

त्तरः भोगमात्रे हेतुत्वान्न व्यसनजनकत्वमित्यर्थः कुतस्तर्हि व्यसनजन्मेत्यत आह भोक्तव्येति तत्र तस्मिन्विषये ६६ व्यसनहेतुं भ्रमं दर्शयति माविनश्यत्विति अयं भोगो माविनश्यतु ॥ श्रीरामचंद्राय नमः ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नसिंदी पं० एवमुक्तरीत्या त्वरेव धर्मतो विघ्नांश्चैनं मामप्रतिबध्नंतु अस्य प्रतिबंधं माकुर्वंतु अस्मादेव भोगादहं धन्यः कृतार्थो

५१ स्मीत्येवंरूपो भ्रमो भवति तत एवाप्रसन्न इत्यर्थः ६७ प्रसंगादस्य परिहारोपायमाह यदभावि न तद्भावि ॥

यद्भवितुमयोग्यं तन्न भवेदेव भवितुं योग्यं चेत्तदन्यथा न भवेदेवेत्येवंरूपश्चिंताविषघ्नः इदं नैश्रेयः [illegible]

माविघ्नाः प्रतिबध्नंतु धर्मोऽस्य स्यादिति भ्रमः ६७ यदभावि न तद्भावि
भावि चेन्न तदन्यथा इति चिंताविषघ्नोऽयं बोधो भ्रमनिवर्तकः ६८

कदा भविष्यतीदमनिष्टं कदा निवर्तिष्यते इत्येवमादि चिंतैव विषमिव स्वसंसृष्टपुरुषस्य नाशहेतुत्वाद्विषमिदं ५१
चिंताविषं हंतीति चिंताविषघ्नः एवंभूतो यो बोधः सोऽयं भ्रमनिवर्तकः पूर्वोक्तभ्रमनिवर्तक इत्यर्थः ६८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ननु विद्वद् विदुषोरुभयोरपि भोगित्वाविशेषेण कस्य व्यसनम परस्य तु तन्नेत्येतत्कुत इत्याशंक्य विपरीतज्ञानस
त्वासत्वाभ्यां तत्सिद्धिरित्याह समेपीति बुद्धवान् ज्ञातवान् ज्ञानीत्यर्थः भ्रांतेः कथं व्यसनहेतुत्वमित्य

समेपि भोगे व्यसनं भ्रांतो गच्छन्नबुद्धवान् अशक्यार्थस्य संकल्पाद्ध्रां
तस्य व्यसनं बहु ६९ मायामयत्वं भोगस्य बुध्वास्थामुपसंहरन्
भुंजानोपि न संकल्पं कुरुते व्यसनं कुतः ७० ॥श्रीरामायनम॥

तथाह अशक्येति ६९ विवेकिनस्तदभावं दर्शयति मायामयत्वमिति ७० श्रीरामायनम॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तृप्तिदी प० ननु मायामयत्वबोधे सत्यपि भोग्यस्य तदानींतन भोग्यस्य सुखहेतुत्वात्कुत आस्थोपसंहार इत्याशंक्य बहुवि
५२ धदोषदर्शनादित्याह स्वप्नेंद्रजालेति ७१ ननूक्तस्वप्नेंद्रजालसादृश्यादिज्ञाने सत्यासक्तिभावो न भवेत्तदेवकु

स्वप्नेंद्रजालसदृशमचिंत्यरचनात्मकं । दृष्टनष्टं जगत्पश्यन्कथं तत्रानुरज्यति ७१ स्वस्वप्नमापरोक्ष्येण दृष्ट्वा पश्यन्स्वजागरं । चिंतयेदप्रमत्तः सन्नुभावनुदिनं मुहुः ७२ ॥श्रीरामाय नमः॥ ॥

तो जायत इत्याशंक्य तज्जन्मोपायमाह स्वस्वप्नमिति स्वकीयं स्वप्नमपरोक्षतया दृष्ट्वा स्वकीयं च जागरमनुभवन्स्व ५२
प्नजागरावुभावप्यप्रमत्तः सन्मुहुश्चिंतयेत् स्वप्नतुल्योयं जागर इति ७२ ॥श्रीरामाय नमः॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

प्रवंतयोः सर्वसाम्यं तात्कालिकभोगहेतुत्वपरिणतिविरसत्वविनाशित्वादिलक्षणं चिरमनुसंधाय जाग
रेऽपि सत्यत्वबुद्धिं परित्यज्य जाग्रद्दृस्त्स्वपि पूर्ववज्जगत्सत्यत्वज्ञानदशायामिव नानुरज्जति अनुरक्तो न भ
वतीत्यर्थः ७३ ननु प्रपंचगोचरस्य मिथ्यात्वज्ञानस्य विषयसत्यत्वोपजीविनो भोगस्य च परस्परविरोधा

चिरंतयोः सर्वसाम्यमनुसंधाय जागरे सत्यत्वबुद्धिं संत्यज्य नानुरज्जति पूर्ववत्
७३ इंद्रजालमिदं द्वैतमचिंत्यरचनात्वतः इत्यविस्मरतो हानिः का वा प्रारब्धभोगतः ७४

मिथ्यात्वज्ञाने सति कथं भोगसिद्धिरित्याशंक्य भोगस्य विषयसत्यत्वापेक्षाभावान्न विरोध इति परिहरति
इंद्रजालमिति इदं द्वैतं भोग्यजातं अचिंत्यरचनात्वादिंद्रजालवन्मिथ्येति युक्त्यानुसंधायाविस्म॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तृप्तिदी॰प॰ रतो विदुषः प्रारब्धभोगतः प्रारब्धकर्मफलयोः सुखदुःखयोरनुभवेन मिथ्यात्वानुसंधानस्य का हानिः वा शब्दा
५३ न्मिथ्यात्वानुसंधानेन वा भोगस्य का हानिः विभिन्नविषयत्वादिति भावः ७४ विभिन्नविषयत्वमेव दर्शयति नि

निर्बंधस्तत्वविद्याया इंद्रजालत्वसंस्मृतौ प्रारब्धस्याग्रहो भोगे जीवस्य सुखदुःखयोः ७५

र्बंध इति तत्वविद्यायाः जगत्तत्वगोचरवेदस्य ज्ञानस्य इंद्रजालवज्जगतो मिथ्यात्वानुसंधाने निर्बंधो न तु भोगापलापे ५३
प्रारब्धकर्मणश्च जीवस्य सुखदुःखयोः प्रदाने आग्रहो न तु भोगस्य सत्यत्वापादाने इति भावः ७५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

एवं विभिन्नविषयत्वं प्रदर्शयन्नयोगमाह विद्यारब्धइति विद्याप्रारब्धकर्मणी परस्परं न विरुध्येते विभिन्न
विषयत्वात्संप्रतिपन्नरूपरसज्ञानवदित्यर्थः भोग्यमिथ्यात्वज्ञानं भोगबाधकं न भवतीत्येतन्न दृष्टमि।

विद्यारब्धे विरुध्येते न भिन्नविषयत्वतः जानद्भिरप्यैंद्रजालोविनोदो दृश्यते खलु ७८

साशंक्याह जानद्भिरिति ऐंद्रजालो विनोद इंद्रजालसंबंधी चमत्कारविशेषः जानद्भिरपि इंद्रजालत्वेन जान
द्भिरप्यवलोक्यत इति प्रसिद्धमित्यर्थः ७८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तृप्तिदी० ५८

किंच विद्याप्रारब्धकर्मणोर्विरोधोस्तीति वदन्प्रष्टव्यः किंप्रारब्धकर्म विद्याविरोधि उत विद्याप्रारब्धकर्मविरोधिनीति नाद्य इत्याह जगत्सत्यत्वमिति प्रारब्धं कर्म जगतो भोग्यजातस्य सत्यत्वमबाध्यत्वमापाद्य संपाद्य यदि भोजयेत् जीवस्य सुखदुःखे दद्यात्तदा विद्याविषयस्य मिथ्यात्वस्यापहाराद्विद्याया विरोधि स्यान्न

जगत्सत्यत्वमापाद्य प्रारब्धं भोजयेद्यदि।
तदा विरोधि विद्याया भोगमात्रान्न सत्यता ७७

तथा करोति किंतु भोगमेव प्रयच्छति अतो न विद्याविरोधि प्रारब्धमिति भावः भोगबलादेव भोग्यस्य सत्यत्व ५८
मपि स्यादित्याशंक्याह भोगमात्रादिति वित्तसत्त्वं भोग्यत्वादित्यत्र दृष्टान्ताभाव इति भावः ७७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ननु मिथ्यापदार्थैर्भोगो न भवतीत्यत्रापि दृष्टान्तेनास्तीत्याशंक्याह अनूद्यत इति ७८ नापह्नुतीयदुत्साह यदीति ॥
विद्या यदि जगद्भोग्यजातं अपह्नुवीत तर्हीदं जगत मिति निषेधकज्ञानवत्प्रतीयमानस्य भोग्यस्य स्वरूपं विलाप

अनूद्यते जायते भोगः कल्पितैः स्वप्नवस्तुभिः जाग्रद्वस्तुभिरप्येवमसत्यैर्भोग इष्यतां ७८
यदि विद्यापह्नुवीत जगत्प्रारब्धघातिनी तदा स्यान्न तु मायात्वबोधेन तदपह्नवः ७९

येन तदा प्रारब्धकर्म भोग्यस्य सुखदुःखानुभवस्य साधनापहारेण प्रारब्धकर्मविघातिनी स्यान्न तु तथा करोति
किंतु मिथ्यात्वमेव बोधयति अतो न प्रारब्धकर्मविरोधिनीति भावः ननु मिथ्यात्वबोधनादेवस्वा ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त्रसि.दी.प. रूपमपि विलापयेदित्याशंक्याह नत्विति इंद्रजालादौ स्वरूपलोपनमंतरेणापि मिथ्यात्वज्ञानदर्शनादिति भावः
५५ १९ एनदेवमपंचयति अनपह्नुत्येति लोकाः जानाः नदिंद्रजालस्वरूपं अनपह्नुत्य अनिरस्य इदमिंद्रजालमि। प
ति जानंति यथा तथा भोगं भोग्यमनपह्नुत्य विलाप्यमायात्वधीः जगन्मिथ्यात्वज्ञानं भवतीत्यर्थः ८० यत्र

अनपह्नुत्य लोकास्तदिंद्रजालमिदं त्विति जानंत्येवानपह्नुत्य भोगं मायात्वधीस्तथा ८०

त्वस्य सर्वमात्मैवाभूत्तत्केन कं पश्येदित्यादिश्रुतिर्द्वैतदर्शनदृश्याभावं बोधयत्यतो विद्योत्यघमानाजगद्विलापये ५५
देवं वंसति विदुषो भोगः कथं स्यादिति श्रुत्यवष्टंभेन शंकते श्लोकद्वयेन ॥ यत्र त्वस्येति॥ ॥श्री॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यत्रयस्यांविद्यावस्थायांकृत्स्नंजगत्अस्यविदुषःस्वात्मैवाभूदिदंसर्वंयदयमात्मेतिज्ञानेनस्वरूपमेवभवति तत्रतस्यांदशायांकोद्रष्टाकेनसाधनेनचक्षुषाकिंदृश्यंरूपजातंपश्येदेवंघ्राणलक्षणेनकिंकुसुमादिकंजिघ्रेत्किंवाऽन्येनवागिंद्रियेणवदेदेवमितरेंद्रियव्यापाराभावद्योतनायवाशब्दःइत्येवंप्रकारेणश्रुतौवहुवार

यत्रत्वस्यजगत्स्वात्मापश्येत्कस्तत्रकेनकिं किंजिघ्रेत्किंवदेद्देतिश्रुतौतुवहुघोषितं ८१
तेनद्वैतमपह्नुत्यविद्योदेतिनचान्यथा तथाचविदुषोभोगःकः यंस्यादितिचेच्छृणु ८२

मभिव्यक्तिमित्यर्थः ८१ ततःकिमित्यतआह तेनेति स्वाप्ययसंपत्त्योरन्यतरापेक्षमाविष्कृतंहिइत्यस्मिन्सूत्रेयत्रत्वस्यसुदाहृतायाःश्रुतेःसुषुप्तिमोक्षयोरन्यतरविषयत्वेनव्याख्यातत्वान्नविद्यायाजगदपह्नवइतिपरिहरति श्लोकवति ८२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त॰ष्टिदी॰प॰ स्वाप्ययः सुषुप्तिः संपत्तिर्मुक्तिरित्यर्थः ८३ अस्याः श्रुतेः सुप्त्यादिविषयत्वानंगीकारे बाधकमाह अन्यथेति ॥

५८ तत्रोपपत्तिमाह द्वैतदृष्ट्याविति याज्ञवल्क्यादिर्यदि द्वैतं पश्येत्तदा द्वैतज्ञानाभावादाचार्यो भवेद्यदि द्वैतं न पश्ये

सुषुप्तिविषया मुक्तिविषया वा श्रुतिस्त्विति उक्तं स्वाप्ययसंपत्त्योरिति
सूत्रेत्यपि स्फुटं ८३ अन्यथा याज्ञवल्क्यादेराचार्यत्वं न संभवेत् ॥
द्वैतदृष्ट्याविद्वत्ताद्वैतादृष्ट्या न वाग्वदेत् ८४ ॥श्री॥ ॥

त्तर्हि बोध्यशिष्याद्यनुपलंभादाचार्यवाक्शिष्यं प्रति बोधनाय न प्रवर्तेत ततो विद्यासंप्रदायोच्छेदप्रसंग इति भा ५८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ननुयाज्ञवल्क्यादीनामाचार्यत्वदशायां विद्यमानस्य ज्ञानस्य विद्यात्वमस्त्येव तथापि तस्य नापरोक्षविद्यात्वं द्वैतभ
नातिसद्भावान्निर्विकल्पसमाधौ तु द्वैतदर्शनाभावात्सैवापरोक्षविद्येति शंकते निर्विकल्पेति द्वैतप्रतीतेरप्र
तिप्रसंगापादकत्वान्नैवमिति परिहरति सुषुप्तिरिति ८५ अतिप्रसंगपरिहारं शंकते आत्मतत्त्वमिति

निर्विकल्पसमाधौ तु द्वैतादर्शनतेनुतः सैवापरोक्षविद्येति चेत्सुषुप्तिस्तथा न किं ८५
आत्मतत्त्वं न जानाति सुप्तौ यदि तदा त्वया आत्मधीरेव विद्येति वाच्यं न द्वैतविस्मृतिः ८६

सुप्तौ द्वैतदर्शनाभावेप्यात्मगोचरज्ञानाभावान्न विद्यात्वं तस्मादयमर्थः तर्हि प्राप्तं प्राप्तविवेकेन ज्ञानस्यैव
विद्यात्वं न द्वैतदर्शनाभावस्येत्याह तदा त्वयेति ८६ ॥श्रीरामायनमः॥ श्रीरामचंद्रायनमः॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त॰सिदा॰प॰ ननुद्वैतादर्शनात्मज्ञानयोरुभयोर्मिलितयोरेव विद्यात्वं नैकैकस्येति शंकते उभयमिति द्वैतविस्मृतेरपि विद्यां
५७ शत्वांगीकारेण उस्यापि अर्धविद्यावत्वप्रसंग इति परिहरति नहइति आत्रोपपत्तिमाह सकलेति ८७ अस्मि

उभयं मिलितं विद्या यदि तर्हि घटादयः अर्धविद्याभाजिनः स्युः सकलद्वैतविस्मृतेः ८७ म
शकध्वनिमुख्यानां विक्षेपाणां बहुत्वतः नव विद्या तथा नः स्यात् घटादीनां यथा दृढा ८८

न्नेवपक्षे समाधिमतां पुरुषाणामर्धविद्यावत्वमपि नः स्यादिति सोपहासमाह मशकध्वनिरिति घटादीनां यथा ५७
द्वैतविस्मरणं दृढं तथा तत्वसमाधौ द्वैतविस्मरणं न संभवति ध्वन्यादीनामनेकेषां विक्षेपाणां सद्भावादित्यर्थः ८८

114

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ननु आत्मज्ञानस्यैव विद्यात्वं नद्वैतविस्मरणेरितिनिशंकते आत्मधीरिति तदस्माकमिष्टमित्यभिप्रायेणाशीर्वा
दयति तर्हीति ननु आत्मधीरेव विद्या सा न दुष्टचित्ते संभवति अतश्चित्तदोषपरित्यागाय चित्तवृत्तिनिरो
धः कार्य इति शंकामनुभाषते दुष्टचित्तमिति तदंगीकरोति निरुंध्यादिति अस्माकमपीतिशेषः ८९ कुत इत्य

आत्मधीरेव विद्येति यदि तर्हि सुखी भव दुष्टचित्तं निरुंध्याद्येन्निरुंधि त्वं यथासुखं ८९ त
दिष्टमेष्टव्यमायामयत्वस्य समीक्षणात् इच्छन्नप्यज्ञवन्नेच्छति किमिच्छन्निति हि श्रुतं ९०

त आह इष्टमेति चित्तदोषापगमे सत्यद्वितीयात्मज्ञानादीष्यमाणं जगन्मायामयत्वं सम्यगीक्ष्यते यतो तदिष्टमि
त्यर्थः एवं किमिच्छन्निति मंत्रांशेन अभिप्रेतमर्थमुपपादितमुपसंहरति इच्छन्निति इच्छन्नप्यज्ञवत्॥ ॥

115

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तत्त्वदीप० त्रैच्छेदतः किमिच्छन्निति श्रुतमिति योजना ९० एवमभिप्रायवर्णने कारणमाह रागो लिंगमिति रागो लिंगमबो
५८ धस्य चित्तव्यायामभूमिषु कुतः शर्म तत्तातस्य यस्याग्निः कोटरे तरोरिति तत्त्वविदो रागनिषेधपरं शास्त्रं सा
स्त्रार्थस्य समाप्तत्वान्मुक्तिः स्यात्तावतामिति रागादयः संतु कामं न तद्भावोपराध्यत इति न स्यैव रागांगाकारप

रागो लिंगमबोधस्य संतु रागादयो बुधे इति शास्त्रद्वयं सार्थमेवं सत्यविरोधतः ९१

रं च शास्त्रं एवं च सति तत्त्वविदो दृढरागाभावे सति शास्त्रद्वयं सार्थमर्थवद्भवति अविरोधतः रागनिषेधपर ५८
स्य शास्त्रस्य दृढरागविषयत्वात्तदभ्युपगमपरस्य शास्त्रस्य रागाभासविषयत्वादिति भावः ९१

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

एवं किमिच्छन्नित्यंशस्याभिप्रायमुपवर्ण्य कस्य कामायेत्यंशस्याभिप्रायमाह जगदिति यथा जगन्मिथ्यात्व
बोधेन वास्तवकाम्याभावविवक्षया किमिच्छन्नित्युक्तमेवमात्मनोऽसंगत्वबोधेन वास्तवभोक्त्रभावविव
क्षया कस्य कामायेत्यभिहितमित्यर्थः ॥ ९२ ननु आत्मनो भोक्तृत्वप्रतिषेधस्तत्प्रसक्तिपूर्वको वक्तव्यः

जगन्मिथ्यात्ववत्स्वात्माऽसंगत्वस्य समीक्षणात् कस्य कामायेति वचो भोक्त्रभावविवक्षया ॥ ९२ पतिजायादिकं सर्वं तत्तद्भोगाय नेच्छति किं त्वात्मभोगार्थमिति श्रुतावुद्घोषि -दि-

सा तु न विघते असंगत्वादात्मन इत्याशंक्य तस्य स्वानुभवसिद्धत्वान्नैवमित्यभिप्रेत्य तदनुवादिकां श्रुतिमर्थतोऽनुक्रा
मति पतिजायादिकमिति न वा अरे पत्युः कामाय पतिः प्रियो भवत्यात्मनस्तु कामाय सर्वं प्रियं भवति।

दितिवाक्यमूलं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तृप्तिदीप० भैणपतिजायादिकस्य प्रपंचस्य आत्मनो भोगसाधनत्वं प्रतिपाद्यते तत आत्मनो भोक्तृत्वप्रसक्तिरित्यर्थः ९३
५९ एवमात्मनो भोक्तृत्वं प्रदर्श्य तदपवादाय भोक्तारं विकल्पयति किं कूटस्थ इति किं कूटस्थस्य भोक्तृत्वमुत चि
दाभासस्य किं वोभयात्मकस्येति विकल्पार्थः तत्र प्रथमं प्रत्याह भोक्ता तत्र न कूटस्थ इति ९४ असंगत्व

किं कूटस्थश्चिदाभासोऽथवा किं वोभयात्मकः भोक्ता तत्र न कूटस्थोऽसंगत्वाद्भोक्तृतां व्रजेत् ९४
सुखदुःखाभिमानाख्यो विकारो भोग उच्यते कूटस्थश्च विकारी चेत्येतन्न व्याहतं कथं ९५

मस्तु भोक्तृत्वमप्यस्तु को दोष इत्याशंक्याह सुखदुःखेति सुखित्वदुःखित्वाभिमानलक्षणो विकारो भोगः सो ५९
संगकूटस्थस्य न युज्यते कूटस्थत्वविकारित्वयोरेकत्र समावेशायोगादित्यर्थः ९५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ननु तर्हि विकारिणश्चिदाभासस्य भोक्तृत्वं स्यादित्याशंक्य विकारित्वेपि निरधिष्ठानस्य तस्यैवासिद्धेर्मैवमिति
परिहरति विकारीति चिदाभासस्य विकारिबुद्ध्युपाध्यधीनत्वात्स्वस्मिन्विकारे संभवत्यपि तस्यारोपि
तस्वरूपत्वेनाधिष्ठानभूतं कूटस्थं विहाय स्वातंत्र्येणावस्थानासंभवात्केवलचिदाभासस्यापि भोक्तृत्वं न

विकारिबुद्ध्यधीनत्वादाभासे विकृतावपि निरधिष्ठाविभ्रांतिः केवला न हि तिष्ठति ९६

संभवतीति भावः ९६ तस्मात्तृतीयः पक्षः परिशिष्यत इत्याह उभयात्मक इति यत एकैकस्य भोक्तृत्वं न संभवती
स्यत उभयात्मकः साधिष्ठानश्चिदाभास एव लोके व्यवहारदशायां भोक्तेत्यभिधीयते परमार्थतस्तूभया
त्मकत्वं न घटत इति भावः ननुह्यसंगोत्य ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रत्नदी० यं पुरुष इत्याद्यावसंगस्यैव योयं विज्ञानमयः प्राणेष्वित्याद्यौ बुद्धिसाक्षित्वस्यापि श्रवणादुभयात्मकभोक्तृस्वरूपम
६० पि पारमार्थिकमेव स्यान्न लौकव्यवहारमात्रसिद्धमित्याशंक्याश्रुतेस्तत्रतात्पर्याभावान्नैवमित्याह तादृगात्मान

उभयात्मक एवातो लोके भोक्तानिगद्यते तादृगात्मानमारभ्य कूटस्थः शेषितः श्रुतौ ८७

मिति तादृगात्मानं बुध्युपाधिकं भोक्तारमात्मानमारभ्यानूद्य कूटस्थः बुध्यादिकल्पनाधिष्ठानभूतश्चिदा ६०
त्मा शेषितः बुध्याद्यनात्मनिरसनेन परिशेषितः श्रुतौ बृहदारण्यकोदाहृतित्यर्थः ८७ ॥श्रीरामायनमः॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तत्र बृहदारण्यकवाक्यार्थं तावत्संक्षिप्य दर्शयति आत्मा कतम इति जनकेन कतम आत्मेत्येवमात्मनि पृष्टे सति याज्ञवल्क्यस्तं विबोधयत् योऽयं विज्ञानमयः प्राणेष्वित्यादिना विज्ञानमयमुपक्रम्य असंगो ह्ययं पुरुष इत्यसंगं कूटस्थं परिशेषितवानित्यर्थः ९८ एवं बृहदारण्यकेऽसंगात्मपरिशेषणप्रकारं प्रदर्श्येतरेयादि

आत्मा कतम इत्युक्ते याज्ञवल्क्यो विबोधयत् विज्ञानमयमारभ्यासंगं तं पर्यशेषयत् ९८
कोऽयमात्मेत्येवमादौ सर्वत्रात्मविचारतः उभयात्मकमारभ्य कूटस्थः शिष्यते श्रुतौ ९९

श्रुत्यन्तरेष्वपि तद्दर्शयति कोऽयमिति कोऽयमात्मेति वयमुपास्महे कतरः स आत्मेत्येवमादौ आत्मविचारेणान्तःकरणोपाधिकमात्मानमारभ्य प्रज्ञानमात्रात्मकः कूटस्थः परिशेषितः एवमन्यत्रापि द्रष्टव्यं ९९

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तृप्तिदीप० एवं युक्तिश्रुतिपर्यालोचनायां उभयात्मकस्य भोक्तुर्मिथ्यात्वं पारमार्थिकस्यासंगस्य कूटस्थस्याभोक्तृत्वं सि
६१ द्धं ननूक्तरीत्या भोक्तुर्मिथ्यात्वे प्राणिनां तस्मिन् सत्यत्वबुद्धिः कुतो जायत इत्याशंक्याह कूटस्थसत्यतामिति

कूटस्थसत्यतां स्वस्मिन् अध्यस्यात्माविवेकतः तात्विकीं भोक्ततां मत्वा न कदाचिज्जिहासति २००

आत्मा लोकप्रसिद्धो भोक्ता अविवेकतः स्वस्य कूटस्थाद्विवेकज्ञानाभावेन कूटस्थनिष्ठं सत्यत्वमात्मनि अ। ६१
ध्यस्य तद्द्वारा स्वनिष्ठस्य भोक्तृत्वस्यापि सत्यतां मत्वा भोगं कादाचिदपि न जहातुमिच्छति २००

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ननु तर्हि आत्मनस्तु कामाय सर्वं प्रियं भवतीत्यात्मशेषत्वं भोग्यस्य कथं प्रतिपाद्यत इत्याशंक्य न कूटस्थात्मशेषत्वं प्रतिपाद्यते किंतु लोकप्रसिद्धोभयात्मकभोक्तृशेषत्वमेव श्रुत्या आत्मनस्तत्रानूद्यत इत्याह भोक्तेति लोके यो भोक्ता स स्वस्यैव भोगाय पतिजायादिकं भोगोपकरणमिच्छतीत्ययं लौकिकवृत्तांतः श्रुत्या सम्यगनूदितो ना

भोक्ता स्वस्यैव भोगाय पतिजायादिमिच्छति । एष लौकिकवृत्तांतः श्रुत्या सम्यगनूदितः १
भोग्यानां भोक्तृशेषत्वान्मा भोग्येष्वनुरज्यतां । भोक्तर्येव प्रधाने तो नुरागं तं विधित्सति २

र्थांतरं प्रतिपाद्यत इत्यर्थः १ अनुवादः किमर्थमित्याशंक्य भोक्तर्येव प्रेम्णो विधानायेत्याह भोग्यानामिति भोग्यानां पतिजायादीनां भोक्तुः स्वस्य भोगोपकरणत्वात् भोग्येष्वनुरागो न कर्त्तव्यः किंतु प्रधानभूते भोक्तर्येवानुरागः कर्त्तव्य इति विधानायेत्यर्थः २

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भक्तिदीप० भो गौरखुप्रेमस्याग्रपुरःसरं आत्मप्रेमकर्त्तव्यतायां दृष्टांतत्वेन स्वप्रेमप्रार्थनापुरःसरं पुराणवचनमुदाहरति याप्रीति

६२ रिति अविवेकानामात्मज्ञानशून्यानां विषयेष्वनपायिनी दृढा या प्रीतिरस्ति हे माधव लक्ष्मीपते सा प्रीतिस्त्वामनुस्म

याप्रीतिरविवेकानां विषयेष्वनपायिनी। त्वामनुस्मरतः सा मे हृदयान्मापसर्पतु ३॥ श्री॥

रतः त्वां चिंतयतः मे हृदयान्मनसः सर्पतु अपगच्छतु मम मनो विषयेष्वासक्तिं परित्यज्य त्वय्येव सदा तिष्ठत्वित्यर्थः ६२

यद्वा अविवेकानां विषयेषु दृढा यादृशी प्रतिरस्ति तादृशी विषयेषु विघ्नमाना प्रीतिः मे हृदयान्मापसर्पतु मा अपग

च्छतु सदा तिष्ठत्वित्यर्थः ३ त्वामनुस्मरतः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भवत्वेवं पुराणेभ्यः तौ किमायातमित्यत आह इतिन्यायेनेति इत्यनेन पुराणोक्तन्यायेन सर्वस्माद्भोग्यजातादि
तिजायादिलक्षणाद्विरक्तधीः विरक्ता धीर्यस्यासौ विरक्तधीः पुरुषः तां भोग्यगोचरां प्रीतिं भोक्तर्यात्मन्युपसं
हृत्य एवमात्मानं बुभुत्सते बोद्धुमिच्छति ४ एवमात्मन्येव प्रेमोपसंहारे फलितं सदृष्टान्तमाह स्रक्चन्दनेति

इतिन्यायेन सर्वस्माद्भोग्यजाताद्विरक्तधीः उपसंहृत्य तां प्रीतिं भोक्तर्येवं बुभुत्सते ४ स्रक्चंद
नवध्वस्त्रसुवर्णादिषु पामरः अप्रमत्तो यथा तद्वन्नप्रमाद्यति भोक्तरि ५ ॥श्री॥ ॥

पामरः पृथक्जनः स्रगादिविषये यथाऽप्रमत्तः सावधानो भवति एवं मुमुक्षुरपि आत्मनि विषयेन प्रमाद्यति
अनवधानं न करोति किं तु तच्चिंतयैव वर्तते इतीत्यर्थः ५ ॥श्री॥ राम राम॥ राम॥ ॥राम॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

न सिदा पृ० अनवधानाभावमेववहुभिर्दृष्टांतैः स्पष्टयति काव्येति यथा विजिगीषुः प्रतिवादिजयकामः इहलोकप्रधानः
६२ पुरुषो निरंतरं काव्यादीनभ्यसति एवं मुमुक्षुरपि सदात्मानं विचारयेत् ६ यथा वैदिकः स्वर्गाद्यर्थाति तत्साध

काव्यनाटकतर्कादिमभ्यस्यति निरंतरं विजिगीषुर्यथा तद्वन्मुमुक्षुः स्वं विचारयेत् ६ जपयागो
पासनादि कुरुते श्रद्धया यथा स्वर्गादिवांछया तद्वद्ब्रह्मात्मत्वे मुमुक्षया ७ चित्तैकाग्र्यं यथा
योगी महायासेन साधयेत् ॥ अणिमादिप्रसक्त्यैवं विविच्यात्स्वं मुमुक्षया ८ ॥श्री॥
॥नानि जपादीनि श्रद्धापु
रः सरमनुतिष्ठति तथा मुमुक्षुर्मोक्षेच्छया स्वश्रोत्रे आत्मनि विश्वासं कुर्यात् ७ योगी योगाभ्यासवान् अणिमाद्यैश्व ६२
र्यलाभेच्छया महायासेन चित्तैकाग्र्यं यथा संपादयेत्तद्वदयमप्यात्मानं सदा विविक्तमाद्देहादिभ्यो विविच्य जानीयादि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नन्वेवमेतेषां सदाभ्यासेन किं फलमित्यत आह कौशलानीति यथोतेषां काव्याद्यभ्यासवतां अभ्यासपाटवेन तस्मि
न्स्तस्मिन्विषये कौशलानि विवर्द्धन्ते एवमस्यापि मुमुक्षोरभ्यासाद्विवेको देहादिभ्यः आत्मनो भेदज्ञानं विशदायते
स्पष्टं भवति ९ विवेकवैशद्यस्य फलमाह विविच्येति अन्वयव्यतिरेकाभ्यां भोक्तृतत्वं भोक्तुः पारमार्थि

कौशलानि विवर्द्धन्ते तेषामभ्यासपाटवात् यथा तद्वद्विवेकोऽस्याप्यभ्यासाद्विशदायते ९ विवि
च्यताभोक्तृतत्वं जाग्रदादिष्वसंगता अन्वयव्यतिरेकाभ्यां साक्षिरूपध्यवसीयते १०

कं स्वरूपं विविच्यता भोग्येभ्यो जडजातेभ्यः भेदेन जानता पुरुषेण जाग्रदादिषु जाग्रत्स्वप्नसुषुप्तिषु अवस्था
सु साक्षिरूपसंगता ध्यवसीयते निश्चीयत इत्यर्थः १० ॥श्रीरामचंद्रायनमः॥ ॥श्रीरामायनमः॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त्रिदीप० अन्वयव्यतिरेकौ दर्शयति यत्र यदिति जाग्रदादिषु मध्ये यत्र यस्मिन्स्थाने जाग्रति स्वप्ने सुषुप्तौ वा यत् स्थूलं
६४ सूक्ष्ममानंदरूपेति त्रिविधं भोग्यं द्रष्टा साक्षिणा दृश्यते अनुभूयते तद्दृश्यं तत्रैव न तस्यामेवावस्थायां तिष्ठतीदं न

यत्र यद्दृश्यते द्रष्टा जाग्रत्स्वप्नसुषुप्तिषु तत्रैव नैवेतरत्रेत्यनुभूतिर्हि संमता ॥

रस्यामवस्थायां नास्ति द्रष्टा तु सर्वत्रानुगततया वर्तते इत्यनुभवः सर्वसंमतः इति प्रसिद्धमेतदित्यर्थः ॥ ६४

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

न केवलमनुभवः किं त्वागमोपीत्यभिप्रायेण सयत्तत्र किंचित्पश्यत्यनन्वागतस्तेन भवति असंगो ह्ययं पुरुषः
स वा एष एतस्मिन्संप्रसादे रत्वा चरित्वा दृष्ट्वैव पुण्यं च पापं च पुनः प्रतिन्यायं प्रतियोन्याद्रवतीत्यादिवाक्यद्व
यमर्थतः पठति सयत्तत्रेति स आत्मा तत्र तस्यामवस्थायां यत्किंचिद्रूपमीक्षते पश्यति तेन दृष्टेन अन०

स यत्तत्रेक्षते किंचित्तेनानन्वागतो भवेत् दृष्ट्वैव पुण्यं पापं चेत्ये
वं श्रुतिषु डिंडिमः १२ जाग्रत्स्वप्नसुषुप्त्यादि प्रपंचं यत्प्रकाशते ॥

न्वागतो भवेत् अनुसृत्यगतो न भवेत् किंतु स्वयमेव अवस्थांतरं गच्छतीत्यर्थः पुण्यं पुण्यफलं सुखं पापं पापफ
लं दुःखं च दृष्ट्वा नाद्यायैवेत्यर्थः १२ भोक्तृतत्त्वविवेचनपराणि श्लोकांतराणि दर्शयति जाग्रदिति ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

न्तिदी प० यत्सत्यज्ञानानंदलक्षणं ब्रह्म साक्षिरूपेण अवस्थितं तत् जाग्रदादिप्रपंचं प्रकाशने प्रकाशयति तद्ब्रह्माहमस्मि न बु

६५ द्धिचिदाभासाद्यहमस्मि इति ज्ञात्वा अस्मत् अनुभवाभ्यां निश्चित्य सर्वैः प्रमातृत्वकर्तृत्वादिभिः प्रमुच्यते प्रकर्षे

तस्माद्ब्रह्माहमिति ज्ञात्वा सर्वबंधैः प्रमुच्यते १३ एक एवात्मा मंतव्यो
जाग्रत्स्वप्नसुषुप्तिषु स्थानत्रयव्यतीतस्य पुनर्जन्म न विद्यते १४

ण सर्वात्मना मुच्यते १३ जाग्रदादिष्ववस्थासु एक एवात्मा मंतव्यः एवं विवेकज्ञानेन स्थानत्रयव्यतीतस्य अवस्थात्र ६५
याद्विविक्तस्य आत्मना पुनर्जन्म न विद्यते एतच्छरीरपातानंतरं शरीरांतरप्राप्तिर्नास्तीत्यर्थः १४ ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त्रिषु धामसु त्रिष्ववस्थानेषु यद्भोग्यं स्थूलसूक्ष्मविविक्तानंदरूपं यश्च भोक्ता विश्वतैजसप्राज्ञरूपो यश्च भोगस्तदनुभवरूपश्चेति येषि पंते तेभ्यः स्थानादिभ्यो विलक्षणो यश्चिन्मात्ररूपः साक्षी सदाशिवः निरतिशयानंदरूपत्वेन सर्वदा शो

त्रिषु धामसु यद्भोग्यं भोक्ता भोगश्च यद्भवेत् तेभ्यो विलक्षणः साक्षी चिन्मात्रोहं सदाशिवः २५ एवं
विवेचिते तत्वे विज्ञानमयशब्दितः चिदाभासो विकारी यो भोक्तृत्वं तस्य शिष्यते २६ ॥श्री॥

भमानः परमात्मास्ति सोहमस्मीत्यर्थः २५ एवं विवेकेनात्मतत्वे संगे निश्चिते सति भोक्तृत्वं कस्येत्यत आह एवं विवेचित
इति यो विज्ञानमयशब्देनाभिधीयमानश्चिदाभासस्तस्य विकारित्वात् भोक्तृत्वमित्यर्थः २६ ॥ श्री॥ ॥

X31

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तृ.दीप० ननु चिदाभासस्य भोक्तृत्वांगीकारे कस्य कामायेति वचो भोक्तृभावविवक्षयेति पूर्वोक्तं स्यात् अन्यथेत्याशंक्य तस्य व-
६६ चनस्य पारमार्थिकभोक्तृभावपरत्वमभिप्रेत्य भोक्तुश्चिदाभासस्य मिथ्यात्वं साधयति मायिकोयमिति अयं
चिदाभासो मायिकः मृषात्मकः श्रुतेः जीवेशावाभासेन करोतीति श्रुतेः अनुभवादपि द्रष्ट्रादित्रितयमध्यव-

मायिकोयं चिदाभासो श्रुतेरनुभवादपि इंद्रजालं जगत्प्रोक्तं तदंतःपात्ययं यतः १७

र्तित्वेन अनुभूयमानत्वादपीत्यर्थः तदेवोपपादयति इंद्रजालमिति इंद्रजालवन्मिथ्याभूते जगत्यंतर्भूतत्वाद ६६
स्यापि मिथ्यात्वं तद्वदनुभूयते विद्वद्भिरिति शेषः यस्माज्जगदंतःपाति अतो मृषेति योजना १७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अस्यजगतइवविनाशित्वानुभवादपिमृषात्वमित्याह विलयोपीति मूर्छादिरादिशब्दार्थः भवतुमृषात्वंत
तः किमित्यतआह एतादृशमिति यदाकूटस्थाद्विवेचितः चिदाभासोमायिकोज्ञातस्तदास्वस्वभावंस्वतत्व

विलयोप्यस्यसुप्त्यादौसाक्षिणात्यनुभूयते एतादृशंस्वस्वभावंविविनक्तिपुनःपुनः १८ वि
विच्यनाशंनिश्चित्यपुनर्भोगंनवांछति मुमूर्षुःशायितोभूमौविवाहंकोभिवांछति १९

मेतादृशंमृषात्मकंपुनर्विविनक्तिकूटस्थाद्विविच्यजानाति १८ ततोपिकिमित्यतआह विविच्येति स्वविनाश
विनिश्चयेभोगेछाभावेदृष्टांतमाह मुमूर्षुरिति १९ ॥श्रीरामचंद्रायनम॥ ॥श्रीरामायनम॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

न्य

तृप्तिदी० किंच पूर्ववदहं भोक्तेति व्यवहर्तुमपि लज्जत इत्याह जिह्रेमीति तर्हि ज्ञानोत्पत्त्यनंतरं प्रारब्धावसानपर्यंतं कथं
६७ व्यवहरतीत्यत आह छिन्ननास इति ह्रीतः लज्जितः क्लिश्यन् इदानीमपि कर्म न क्षीयत इति क्लेशमनुभवन् प्रा
रब्धमश्नुते प्रारब्धकर्मफलं भुंक्ते इत्यर्थः २० इदानीं ज्ञानानंतरं साक्षिणो भोक्तृत्वाभावः कैमुतिकन्यायसि

जिह्रेति व्यवहर्तुं च भोक्ताहमिति पूर्ववत् छिन्ननास इव ह्रीतः क्लिश्यन्नारब्धमश्नुते २० न्य
यदा स्वस्यापि भोक्तृत्वं मंतुं जिह्रेत्ययं तदा साक्षिण्यारोपयेदेतदिति कैव कथा वृथा २१

द्ध इत्याह यदा स्वस्येति अयं चिदाभासः स्वस्यापि भोक्तृत्वं मंतुं अहं भोक्तेति ज्ञातुं जिह्रेति विलज्जते यदा तदा एत ६७
त् स्वगतं भोक्तृत्वं साक्षिण्यसंगे आरोपयेदिति वृथा कथाऽर्थस्याः केवलं कापीत्यर्थः २१ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

उक्तमर्थं श्रुत्यारूढं करोति इत्यभिप्रेत्येति कस्य कामायेति श्रुतिरित्यर्थः कूटस्थस्य चिदाभासस्य वा पारमार्थिकभो
क्तृत्वाभावमभिप्रेत्याविशंकयाशंकाराहित्येन भोक्तारमाक्षिपति निराकरोति भवत्वेवं भोक्ताक्षेपः ततः किमित्यत आ

इत्यभिप्रेत्य भोक्तारमाक्षिपत्यविशंकया कस्य कामायेति ततः शारीरानुज्वरो न हि २३
स्थूलं सूक्ष्मं कारणं च शरीरं त्रिविधं स्मृतं अवश्यं त्रिविधोस्त्येव तत्र तत्रोचितो ज्वरः २२
वातपित्तश्लेष्मजन्याव्याधयः कोटिशस्तनौ दुर्गंधत्वकुरूपत्वदाहभंगादयस्तथा २४

ह तत इति २२ ज्वरो ज्वरणं संतापः तत्त्वविदः शारीरज्वरानुज्वराभावं दर्शयितुं शरीरभेदं तत्र तत्र ज्वरसद्भावं च
दर्शयति स्थूलमिति २३ तत्र स्थूलशरीरे ज्वरांस्तावदाह वातपित्तेति २४ ॥श्रीरामायनमः॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नृसिंह।प० स्वदेहशरीरे ज्वरान्दर्शयति कामेति कामादीनां शांत्यादीनां च ज्वरत्वमुपपादयति हृद्येपीति हृद्येपि हृदि विधावपि
६८ क्रमेण प्राप्यप्राप्तिभ्यां नरं वाधंते। तेनो ज्वरसाम्या ज्वरा इत्युच्यंत इत्यर्थः २५ कारणेशरीरगतो ज्वरः छांदोग्य
श्रुतौ उक्त इत्याह स्वं परं चेति नाहं खल्वयमेवं संप्रत्यात्मानं जानात्ययमहमस्मीति नो एवेमानि भूतानि विना

कामक्रोधादयः शांतिदांत्याद्या लिंगदेहगाः ज्वरा हृद्येपि वाधंते प्राप्त्याप्राप्त्या नरं क्रमात् २५
स्वं परं च न वेत्त्यात्मा विनष्ट इव कारणे आगामिदुःखबीजं चेत्येतन्द्रिंद्रेण दर्शितं २६

शमेवापीतो भवति नाहमत्र भोग्यं पश्यामीति वाक्येन स्वपरज्ञानशून्यत्वमज्ञाने नष्टप्रायत्वं परेघागामिदुः २६८
खबीजवासनासद्भावं चेत्येतन्द्रिंद्रेण शिष्येण गुरोः प्रजापतेः पुरतो निवेदितमित्यर्थः २६

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

एवं त्रिष्वपि देहेषु ज्वरानभिधाय तेषामपरिहार्यत्वमाह एत इति त्रिष्वपि शरीरेषु प्रतीयमानाः एते ज्वराः शरीरैः सह तेषां सन्नत्वेन स्वाभाविकाः संमताः स्वाभाविकत्वं व्यतिरेकमुखेन द्रढयति वियोगे त्विति यतः कारणात् एभिर्ज्वरैः तेषां शरीराणां वियोगे। तानि शरीराणि नासन्नेव नैव भवेयुः अतः स्वाभाविका इत्यर्थः २७ तत्र दृष्टांत

एते ज्वराः शरीरेषु त्रिषु स्वाभाविका मताः। वियोगे तु ज्वरैस्तानि शरीराण्येव नासते २७ तंतो

विमुक्तेत पटो बल्लिभ्यः कंवलो यथा मृदो घटस्तथा देहो ज्वरेभ्योपीति दृश्यतां २८ चिदाभा

सेस्वतः कोपि ज्वरो नास्ति यतश्चितः प्रकाशैकस्वभावत्वमेव हि दृष्टं न चेतरत् २९ ॥श्री॥

॥मात॥ तंतोरि

ति २८ इदानीं कूटस्थे ज्वराभावं कैमुतिकन्यायेन दिदर्शयिषुश्चिदाभासे तावज्ज्वराभावं दर्शयति चिदाभास इति

चिदाभासे स्वतः शरीरत्रयगतज्वरसंबंधमंतरेण न कोपि ज्वरो विद्यते कुत इत्यत आह ॥ श्री ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

टस्थदीप० ६९ यतइति॥ चितः प्रकाशैकस्वभावस्य विद्वदनुभवसिद्धत्वात्तत्प्रतिबिंबस्यापि चिदाभासस्य त
थात्वमेवेष्टव्यमिति भावः २९ यदर्थं चिदाभासे ज्वराभाव उपपादितस्तदिदानीं दर्शयति चिदाभासेपीति
यदा चिदाभासेपि ज्वराः नसंभाव्यंते तदा न साक्षिणि संभवंतीति किमु वक्तव्यमिति भावः ननु तर्हि ज्वराणामीस्य

चिदाभासेप्यसंभाव्या ज्वराः साक्षिणि का कथा एवमप्येकतां मेने चिदाभासो ह्यविद्यया ३०
साक्षिसत्यत्वमध्यस्य स्वेनोपेते वपुल्लये नतस्य वै वास्तवं स्वस्य स्वरूपमिति मन्यते ३१

नुभवस्य का गतिरित्यत आह एवमपीति ३० एकतां मेन इति संक्षेपेणोक्तमर्थं प्रपंचयति साक्षिसत्यत्व
मिति चिदाभासः स्वेन सहिते शरीरत्रये साक्षिगतं सत्यत्वमध्यस्य तत्सर्वं ज्वरवच्छरीरत्रयं स्वस्य वास्तवं रूपं म रामकृष्ण ६९

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

एवंभ्रांतिज्ञानेसति किंभवतीत्यत आह एतस्मिन्निति अयंचिदाभासोऽस्यांभ्रांतिवेलायांशरीरनिष्ठज्वरंस्वा
त्मन्यारोपयतीत्यर्थः तत्रदृष्टांतमाह कुटुंबिवदिति ३२ दृष्टांतंविशदयति पुत्रेति ३३ एवमविवेकदशा

एतस्मिन्भ्रांतिकालेयंशरीरेषुज्वरत्वथ स्वयमेवज्वरामीतिमन्यतेहिकुटुंबिवत् ३२
पुत्रदारेषुतप्यत्सुतप्यामीतिरथा यथा मन्यतेपुरुषस्तद्वदाभासोप्यभिमन्यते ३३ वि
विच्यभ्रांतिमुज्झित्वास्वमप्यगणयन्सदा चिंतयन्साक्षिणंकस्माच्छरीरमनुसंज्वरेत् ३४

यांचिदाभासेभ्रांत्याज्वरंमद्दर्शीविवेकदशायांतदभावंदर्शयति विविच्येतिचिदाभासःकूटस्थंस्वात्मानंश
रीराणिचविविक्तभेदेनज्ञात्वाइदंसर्वं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नसिद्दा १० ममवास्तवंस्वरूपमितिमन्यतइत्यर्थः भ्रांतिंपरित्यज्यस्वस्याभासरूपत्वज्ञानेनस्वस्मिन्नप्यादरमकुर्वन्स्वस्य
७० निजंरूपंज्वरादिरहितंसाक्षिलिंगंसदाचिंतयन्शरीरमनुज्वरवच्छरीरमनुसत्स्वयंकस्मात्संज्वरेन्नसंज्वरेदेवं

अयथावस्तुसर्पादिज्ञानंहेतुः पलायने॥ र
ज्जुज्ञाने१ हि धीध्वस्तौकृतमप्यनुशोचति २५

सर्थः २४ भ्रांतिज्ञानतत्वज्ञानयोर्ज्वरनदभावकारणत्वंदृष्टांतप्रदर्शनेनस्पष्टयति अयथेतिरज्ज्वादौकल्पि
तस्यसर्पादेर्ज्ञानंपलायनेकारणंभवतिआदिशब्देनस्थाणौकल्पितचौरोग्रहणरतेज्ज्वादिज्ञानेनसर्पादिबु ७०
द्धिनिवृत्तौतदपिपलायमनुशोचतिरथाकृतंमयेत्यनुतप्यतइत्यर्थः २५ ॥श्रीरामायनम॥ ॥

140

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

साक्षिणं सदा चिंतयन्निस्फटिकं दृष्टांतेन स्पष्टयति मिथ्येति यथा लोके मिथ्याभियोगकर्तारं दोषसमाशङ्क्य समाधानार्थं मिथ्याभियुक्तं पुनः पुनः समापयति एवमयं चिदाभासोऽपि साक्षिण्यसंगात्मनि भोक्तृत्वाद्यारोपलक्षणं मिथ्याभियोगदोषमाशङ्क्य तन्निवारणार्थं साक्षिणमात्मानं समापयन्निव शरणं गतः ३६ तत्रैव दृष्टांतांतरमाह

मिथ्याभियोगदोषस्य समाशङ्क्य तन्निवृत्तिसिद्धये समापयन्निवात्मानं साक्षिणं शरणं गतः ३६

आवृत्तपापनुत्त्यर्थं स्नानाद्यावर्त्यते यथा आवर्तयन्निव ध्यानं सदा साक्षिपरायणः ३७

आवृत्तेति यथा पापकारिणा पुरुषेणावृत्तपापनुत्त्यर्थमभ्यस्तपापापनोदनाय विहितं स्नानादिकं समाशङ्क्य तन्निवृत्तये पुनः पुनरनुष्ठीयते तथायमपि चिरं साक्षिणि संसारित्वारोपदोषपरिहाराय ध्यानमावर्तयन्निव सदा साक्षिपरायणो भवति ३७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नाटदीप० एवंसाक्षिप्रत्वेदृष्टांतेरूपवर्णस्वमुपमख्यापनेलज्जालुत्वं सदृष्टांतमाह उपस्थेति ३८ दानीशरीरत्रया॥
७१ द्विवेचितस्यचिदाभासस्यपुनस्तैः सहतादात्म्यभ्रमाभावे दृष्टांतमाह गृहीतइति ३९ नकेवलंस्वापराध

उपस्थकुर्वीनीवेश्याविलासेषुविलज्जते जानंतोपितथाभासः स्वमख्यातौविलज्जति ३८
गृहान्तोब्राह्मणोम्लेच्छैः प्रायश्चित्तंचरन्मुनेः म्लेच्छैःसंकीर्यतेनैवतथाभासःशरीरकैः ३९
यौवराज्येस्थितोराजपुत्रःसाम्राज्यवांछया राजानुकारीभवतितथासाक्ष्यनुकार्ययं ४०

निरत्नयेसाक्ष्यनुसरणंकिंतुमहत्तमयोजनसिध्यर्थमपीतिसिंहावलोकनन्यायेनसदृष्टांतमाह यौवराज्य ७१
इति राजानुकारीभवति राजैवप्रजारंजनादिगुणवान्सभवतीत्यर्थः ४० श्रीरामार्पणमस्तु॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ननुयुवराजस्यराजानुसरणेसाम्राज्यंफलंदृश्यतेतेनैवंसाक्ष्यनुसरणेऽनस्तदनुसरणेकथंप्रवर्त्ततइत्याशंक्याह
योब्रह्मेति सयोहवैतत्परमंब्रह्मवेदब्रह्मैवभवतिनास्याब्रह्मवित्कुलेभवतितरतिशोकंतरतिपाप्मानंगुहा
ग्रंथिभ्योविमुक्तोमृतोभवतीतिश्रुतोब्रह्मभावादिरूपस्यफलस्यश्रूयमाणत्वात्तत्फलवांछयासाक्ष्यनुसर

योब्रह्मवेदब्रह्मैवभवत्सेषइतिश्रुतिः श्रुत्वातदैकचित्तःसन्ब्रह्मवेत्तिनचेतरत् ४१ देव
त्वकामाअग्न्यादौप्रविशंतियथातथा साक्षित्वेनावशेषायस्वविनाशंसवांछति ४२

णेप्रवर्त्तेनंयुक्तमित्यर्थः ४१ ननुब्रह्मज्ञानेनब्रह्मभावप्राप्तौचिदाभासत्वमेवविनश्येदतःस्वनाशायकथंप्रवर्त्तेत
इत्याशंक्याह देवत्वकामाइति यथालोकेदेवत्वप्राप्तिकामामनुष्याअग्न्यग्निप्रयागंगंगाप्रवेशादौप्रवर्त्तंते

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तृप्तिदी॰प॰ एवंसाक्षिरूपेणअवस्थानलक्षणस्याधिकफलस्यविद्यमानत्वाच्चिदाभासत्वापगमहेतौब्रह्मज्ञानेपिमरणनिर्घ
७२ टतएवेत्यर्थ ४२ ननुतत्वज्ञानेनाभासत्वमपगच्छतिचेत्कथंतत्वविदांजीवत्वव्यवहारइत्याशंक्यप्रारब्धकर्मक्ष

यावत्स्वदेहदारादौसनरत्वंनैवमुंचति यावदारब्धदेहंस्यान्नाभासत्वविमोचनं ४३

यपर्यंतंतदुपपत्तिंसदृष्टांतमाह यावदिति यथाग्न्यादौप्रविष्टःपुरुषःदाहादिनास्वदेहनाशपर्यंतंनरत्वंनर ७२
त्वव्यवहारयोग्यत्वंनैवमुंचति एवंप्रारब्धकर्मक्षयपर्यंतंचिदाभासत्वव्यवहारोननिवर्तत इत्यर्थः ४३

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ननु भो कृत्स्नादिभ्रमोपादानस्याज्ञानस्य निवृत्तत्वात्पुनः कथं भोगानुवृत्तिः कथं वा मर्त्योऽहमिति विपरीतमतौ।
निरिस्यारासहदृष्टांतप्रदर्शनेन एतत्संभावयति रज्जुज्ञानेति ४४ दार्ष्टांतिके योजयति एवमिति ४५ ननु पुन

रज्जुज्ञानेपि कंपादिशनैरेवोपशाम्यति पुनर्मंदांधकारे सा रज्जुः क्षिप्तोरगीभवेत् ४४ एव
मारब्धभोगोपि शनैः शाम्यति नो हठात् भोगकाले कदाचित्तु मर्त्योऽहमिति भासते ४५ नैता
वतापराधेन तत्त्वज्ञानं विनश्यति जीवन्मुक्तिव्रतं नेदं किं तु वस्तुस्थितिः खलु ४६

बु
र्मर्त्यत्वबुद्ध्युदयेन तत्त्वज्ञानं बाध्यते स्यात्संशय इह नैतावतेति कदाचिदहं मर्त्य इत्येवं विज्ञानोदयमात्रेणागमप्रमाणज
नितत्त्वज्ञानं न बाध्यते कुत इत्यत आह जीवन्मुक्तीति इदं मर्त्यत्वबुद्ध्यकरणलक्षणं जीवन्मुक्तिव्रतं नियमे

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तृप्तिदीप० नानुदेष्यंनभवति किंतुसम्यक्ज्ञानेनभ्रांतिज्ञाननिवृत्तिरित्ययंवस्तुस्वभावः अतः कदाचिन्मर्त्यस्त्वबुध्यु
७३ द्येपिपुनस्तत्त्वज्ञानांतरेणतस्याएववाधमत्वमितिभावः ४६ भवतुरज्जुसर्पादिस्थलेविपरीतज्ञान
निवृत्तावपितत्कार्यकंपाद्यनुवृत्तिः मस्तुतदृष्टांतेदशमोदशमस्त्वमसीतिवाक्यविचारजन्यज्ञानेनभ्रम

दशमोपिशिरस्ताडनरुदनंबुध्वानरोदिति शिरोव्रणस्तुमासेनशनैःशाम्यतिनोतदा ४७

निवृत्तौतत्कार्यानुवृत्तिर्नोपलभ्यतइत्याशंक्याह दशमोपीति दशमोस्मीतिज्ञानोदयेसतिशिरस्ताडन ७३
पूर्वकंरोदनमात्रंनिवर्त्ततेताडनजन्यव्रणस्त्वनुवर्त्ततएवेत्यर्थः ४७ ॥राम॥ ॥राम॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ननुत्तानोत्तरकालेपि संसारानुवृत्तौ मुक्तेः कुतः पुरुषार्थतेत्याशंक्य मुक्तिलाभजन्महर्षस्य तद्दुःखाच्छादक
स्यसत्वात्पुरुषार्थतेति दृष्टांतपूर्वकमाह दशमेति ४८ जीवन्मुक्तिव्रतं नेदमित्युक्तं तत्र व्रतत्वाभावे कि

दशमस्मृतिलाभेन जातो हर्षो व्रणव्यथां तिरोधत्ते मुक्तिलाभस्तथा प्रारब्धदुःखितां ४८
व्रताभावाद्यदाध्यासस्तदा भूयो विविच्यतां रससेवी दिने भुंक्ते भूयो भूयो यथा तथा ४९

मायातमित्यत आह व्रताभावादिति पुनः पुनर्विचारकरणे दृष्टांतमाह रससेवीति यथा रससेवी नरः
एकस्मिन्दिने क्षुद्बाधापरिहाराय पुनः पुनर्भुंक्ते तद्वदध्यासनिवृत्तये पुनः पुनर्विवेकः क्रियतामित्यर्थः ४९

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

र.सिदी.प. ज्ञानेनानिवर्त्यस्यप्रारब्धकर्मफलस्य केनतर्हि निवृत्तिरित्याशंक्याताउनजन्मव्रणस्यौषधेनेव भोगेनैव निवृत्तिरित्याह

७४ शमयतीति ५० अपरोक्षज्ञानशोकनिवृत्त्याख्येउभे इमे। अवस्थे जीवगे ब्रूते आत्मानं चेदिति श्रुतिः इत्यनेन श्लोकेन आ त्मा

त्मानं चेद्विजानीयादयमस्मीति पूरुषः किमिच्छन्कस्य कामाय शरीरमनुसंज्वरेदित्यस्मिन्मंत्रे अपरोक्षज्ञानशोकनि

वृत्त्याख्ये जीवावस्थे द्वे अभिहिते तत्र कं इदानीं तदभिधानसूचितां जीवस्य समीत निलक्षणामवस्थां रत्नानुकीर्त्त

शमयत्यौषधेनायं दशमः स्वं व्रणं यथा भोगेन शमयित्वैतत्प्रारब्धं मुच्यते तथा ५० किमिच्छन्निति वाक्योक्तः

शोकमोक्ष उदीरितः

॥ न पूर्वश्लोकं वक्तुमारभते किमिच्छन्नितीति किमिच्छन्नित्युत्तरार्धेनाभिहितोयः शोक

मोक्षः स एतावता ग्रंथसंदर्भेण उदीरितोऽभिहितः एषा अज्ञानमावृतिस्तद्वद्विक्षेपश्च परोक्षधीः अपरोक्षमतिः ७४

शोकमोक्षस्तु निरंकुशेत्यनेन श्लोकेन अभिहितास्सु सप्तसु जीवावस्थासु षष्ठीत्याह॥ श्रीरामायनमः॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

आभासस्येति सप्तमी व्याख्याय तद्इतिशेष ५१ अपरोक्षज्ञानजन्मायास्तृप्तेर्निरंकुशत्वं प्रतियोगिप्रदर्शनपुरः
सरं प्रतिजानीते सांकुशेति विषयलाभजन्मायास्तृप्तेर्विषयांतरकामनया कुंठितत्वात्सांकुशत्वमस्या

आभासस्य त्ववस्थैषा पुष्टेति स्तिमितस्सप्तमी ५१ सांकुशा विषयैस्तृप्तिरियं तृप्तिर्निरंकुशा कृतं कृतं
प्राप्तणीयं प्राप्तमित्येवं तृप्यति ५२ ऐहिकामुष्मिकव्रातसिद्ध्यै मुक्तेश्च सिद्धये बहु कृत्यं पुरास्याभूत्तत्सर्वम्

स्ति तदभावान्निरंकुशत्वं तदेव दर्शयति कृतमिति ५२ कृतकृत्यत्वमेवोपपादयति ऐहिकेति अस्य विदुष
स्तत्वज्ञानोदयात्पूर्वमिह लोके इष्टप्राप्तये अनिष्टनिवृत्तये च कृषिवाणिज्यादिकं स्वर्गा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रत्नदी० दिसिद्धये योगोपासनादिकं मोक्षसाधनज्ञानसिद्धये श्रवणादिकं चेति बहुविधं कर्त्तव्यमासीदिदानीं तु सांसारिकफलेच्छा
७५ भावान्नब्रह्मानंदसाक्षात्कारस्य सिद्धत्वाच्च तत्सर्वं कृषियोगश्रवणादिकं कृतमायमभूदितः परमनुष्ठेयाभावादि

तदेतत्कृतकृत्यत्वं प्रतियोगिपुरःसरं अनुसंदधदेवायमेवं तृप्यति नित्यशः ५४ ॥श्री॥ ॥

सर्यू: ५३ एवं कृतकृत्यत्वमुपपाद्य तत्फलभूतां तृप्तिं दर्शयति तदेतदिति प्रतियोगिपुरःसरं प्रतियोग्यनुसंधान ७५
पूर्वकं यथा भवति तथा एवं वक्ष्यमाणप्रकारेण सर्वदा तृप्यति ५४ ॥श्री॥ ॥श्री॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तदेवानुसंधानं प्रपंचयति दुःखिनो ज्ञा इत्यादिना कृतकृत्यतयात्मतः प्राप्तप्राप्ततया पुनरिस्यतः प्राक्तनेन ग्रंथेन तत्र तावदैहिकसुखार्थिभ्यो वैलक्षण्यं स्वस्य दर्शयति दुःखिन इति ५५ स्वर्गाद्यर्थं कर्माद्यनुष्ठातृभ्यो वैलक्ष

दुःखिनोऽज्ञाः संसरंतु कामं पुत्राद्यपेक्षया परमानंदपूर्णोहं संसरामि किमिच्छया ५५ अनु
तिष्ठंतु कर्माणि परलोकयियासवः सर्वलोकात्मकः कस्मादनुतिष्ठामि किं कथं ५६ व्याच
क्षतां ते शास्त्राणि वेदानध्यापयंतु वा येत्राधिकारिणो मे तु नाधिकारोऽक्रियत्वत ५७

॥ण्पमाह॥

अनुतिष्ठंत्विति ५६ ननु स्वार्थप्रवृत्त्यभावेपि परार्थप्रवृत्तिः किं न स्यादित्याशंक्य अधिकाराभावात्सापि नास्तीत्या

रामगीताटी ५७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त॰दी॰पु॰ ननु स्वदेहनिर्वाहार्थं भिक्षाहरणादिकं परलोकार्थं स्नानादिकं च भवता क्रियमाणमुपलभ्यते ऽतो क्रियत्वमसि
७६ द्धमित्याशंक्य तदपि स्वदृष्ट्या नैवास्ति किंत्वन्यैरेव कल्प्यत इत्याह निद्राभिक्षेति ५८ अन्यकल्पनयापि बाधोऽस्ती
त्याशंक्य तदभावे दृष्टान्तमाह गुंजापुंजादीति ५९ ननु फलांतरेच्छाभावे कर्मानुष्ठानं माभून्न तत्त्वसाक्षात्कारा

निद्राभिक्षे स्नानशौचे नेच्छामि न करोमि च द्रष्टारश्चेत्कल्पयंति किं मे स्यादन्यकल्पनात् ५८ गुंजा
पुंजादि दह्येत नान्यारोपितवह्निना नान्यारोपितसंसारधर्मानेवमहं भजे ५९ शृण्वंत्वज्ञाततत्त्वा
स्ते जानन्कस्माच्छृणोम्यहं मन्यंतां संशयापन्ना न मन्येऽहमसंशयः ६०

॥ य श्रवणादिकं कर्तव्यमेवेत्याशंक्य
अज्ञानाद्यभावाच्छ्रवणादिकर्तव्यमपि नास्तीत्याह शृण्विति अज्ञाततत्त्वाः अज्ञातं ब्रह्मात्मैकत्वलक्षणं तत्त्वं यैस्ते ॐ हरिः ७६
तथाभूताः श्रवणं कुर्वंतु तत्त्वमित्थमन्यथा वेति संशयवंतो मननं कुर्वंतु मम तु तदुभयाभावान्नोभयत्र प्रवृत्तिरि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मान्हतां श्रवणमनने विपर्ययनिरासार्थं निदिध्यासनं कर्त्तव्यमित्याशंक्य देहादावात्मत्वबुद्धिलक्षणस्य विपर्य
यस्याभावात्तदपि नानुष्ठेयमित्याह विपर्यस्त इति ६१ ननु विपर्ययाभावेऽहं मनुष्य इति व्यवहारः कथं घट

विपर्यस्तो निदिध्यासेत्किं ध्यानमविपर्यये देहात्मत्वविपर्यासं न कदाचिद्भजाम्यहं ६१ अहं म
नुष्य इत्यादिव्यवहारो विनाप्यमुं विपर्यासं चिराभ्यस्तवासनातोऽवकल्पते ६२ प्रारब्धकर्मणि
क्षीणे व्यवहारो निवर्त्तते कर्माक्षये त्वसौ नैव शाम्येद्ध्यानसहस्रतः ६३ ॥श्री॥ ॥

त इत्याशंक्य वासनावशाद्भवतीत्याह अहं मनुष्य इति ६२ तर्ह्यस्य व्यवहारस्य निवृत्तिसिद्धये ध्यानं संपाद्यमि
त्याशंक्य प्रारब्धक्षयमंतरेणास्य निवृत्तिर्नास्तीत्याह प्रारब्धकर्मणीति ६३ ॥श्री॥ ॥श्री॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तृप्तिदीप० ननुमारब्धनिमित्तकस्यापिव्यवहारस्यविरलत्वाय ध्यानंकर्तव्यमेवेत्याशंक्यव्यवहारस्याबाधकत्वदर्शनान्न विरक्त
७७ येध्यानमननुष्ठेयमित्याह विरलत्वमिति ६४ ध्यानस्याकर्तव्यत्वेपिविक्षेपपरिहाराय समाधिः कर्तव्य इत्याशंक्य।

विरलत्वंव्यवहृतेरिष्टंचेत्ध्यानमस्तुते अबाधिकांव्यवहृतिंपश्यन्ध्यायाम्यहंकुतः ६४ विक्षेपो
नास्तियस्मान्मेनसमाधिस्ततोमम विक्षेपोवासमाधिर्वामनसःस्याद्विकारिणः ६५ नित्यानुभ
वरूपस्यकोमेत्रानुभवःपृथक् कृतंकृत्यंप्रापणीयंप्राप्तमित्येवनिश्चयः ६६ ॥श्री॥ ॥

॥विक्षेपसमाधानयोर्म
नोधर्मत्वान्नविक्षेपनिवारकेपिसमाधौममाधिकारइत्याह विक्षेपइति ६५ ननुतथापिसमाधिफलानुभवःसंपा ७७
दनीयइत्याशंक्यतस्यमत्स्वरूपत्वान्नसंपाद्यइत्याह नित्यानुभवेति उपपादितंकृतकृत्यत्वंनिगमयतिकृतंकृत्यमि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

एवंसर्वत्रकर्तृत्वानभ्युपगमेऽनियतवृत्तित्वंप्रसज्येतेत्याशंक्यप्रारब्धवशात्प्राप्तमनियतवृत्तित्वमंगीकरोति
व्यवहारइति लौकिकोभिक्षाहारादिःशास्त्रीयोजपसमाध्यादिः अन्यथापिवाप्रतिषिद्धहिंसादिर्वाव्यव

व्यवहारोलौकिकोवाशास्त्रीयोवान्यथापिवा ममाकर्तुरलेपस्ययथारब्धंप्रवर्ततां ६७ अ
थवाकृतकृत्योपिलोकानुग्रहकाम्यया शास्त्रीयेणैवमार्गेणवर्तेहंकाममक्षतिः ६८

हारःकर्तृत्वभोक्तृत्वादिरहितस्यममप्रारब्धंकर्मानतिक्रम्यप्रवर्ततामित्यर्थः ६७ एवंवस्तुतत्त्वमभिधायश्रे
ष्ठाचारेणाह अथवेति लोकानुग्रहकाम्ययामाऽनुग्रहेच्छयेत्यर्थः ६८ ॥श्रीरामायनमः॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

न सिद्धा० शास्त्रीयमार्गप्रवर्तनांगीकारे तर्हि तदभिमानप्रयुक्तो विकारः स्यादेवेत्याशंक्याह देवार्चनेत्यादिना श्लोकद्वयेन
७८

देवार्चनस्नानशौचभिक्षादौ वर्ततां वपुः तारं जपतु वाक् तद्वत्पठत्वाम्नायमस्तकं ६९ विष्णुं
ध्यायतु धीर्यद्वा ब्रह्मानंदे विलीयतां साक्ष्यहं किंचिदप्यत्र न कुर्वे नापि कारये ७० एवं च कल
हः कुत्र संभवेत्कर्मिणो मम विभिन्नविषयत्वेन पूर्वापरसमुद्रवत् ७१ वपुर्वाग्धीषु निर्बं
धः कर्मिणो न तु साक्षिणि ज्ञानिनः साक्ष्यलिप्तत्वे निर्बंधो नेतरत्र हि ७२ ॥श्री॥ ॥

७८

तारं प्रणवं आम्नायमस्तकं वेदांतशास्त्रं ६९।७० फलितमाह एवं चेति ७१ विभिन्नविषयत्वमेव स्पष्टयति वपुरिति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अथापि ये ज्ञानिकर्मिणो कलहं कुर्वीते तौ विद्वद्भिः परिहसनीयावित्याह एवमिति ७३ कुतः परिहास्यत्वमित्या
शंक्य निर्विषयकलहकारित्वादित्याह यं कर्मीति ७४ कर्मी यं साक्षिणं कर्मानुष्ठानोपयोगिदेहवाग्बुध्यतिरि

एवं चान्योन्यहंतांतानभिज्ञौ बधिराविव विवदेतां बुद्धिमंतौ हसेतेव विलोकयतौ ७३ यं कर्मी न
विजानाति साक्षिणं तस्य तत्त्ववित् ब्रह्मत्वं बुध्यतां तत्र कर्मिणः किं विहीयते ७४ देहवाग्बु
द्ध्यरूपत्वात् ज्ञानिनान्तबुद्धितः कर्माभवन्नेयत्वाभिज्ञानि नोहायतेत्र किं ७५ ॥श्री॥

क्तं प्रत्यगात्मानं न विजानाति तत्त्वविदा तस्य ब्रह्मत्वे बुद्धे कर्मिणः कर्मानुष्ठाने किं हीयते ज्ञानिना मिथ्यात्वबुध्या परित्य
क्ताभिर्देहवाग्बुद्धिभिः कर्मानुष्ठाने ज्ञानिनो वा किं हीयते। तौ निर्विषयकलहकारिणौ परिहसनीयावित्यर्थः ७५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तृ॰दी॰प॰ कर्मानुष्ठानं प्रयोजनशून्यत्वाज्ज्ञानिना नाभ्युपगम्यते इति शंकते प्रवृत्तिरिति उपयोगाभावो निवृत्तावपि समान
७९ इति परिहरति निवृत्तिरिति निवृत्तेर्बोधहेतुत्वान्नोपयोगाभाव इति शंकते बोधहेतुरिति तर्हि प्रवृत्तिरपि
बुभुत्साहेतुत्वादुपयोगवतीत्याह बुभुत्सायामिति ७८ ननु बुद्धस्य बुभुत्साभावात्प्रवृत्तेरनुपयोगित्वमिति

प्रवृत्तिर्नोपयुक्ता चेन्निवृत्तिः कोपयुज्यते बोधहेतुर्निवृत्तिश्चेद्बुभु
त्सायां तथेतरा ७८ बुद्धश्चेन्न बुभुत्सेत नाप्यसौ बुध्यते पुनः॥ श्रो॥

पुनः शंकते बुद्धश्चेदिति नहि बुद्धस्य पुनर्बोधाभावान्न हेतुर्निवृत्तिरपि बुद्धं प्रत्यनुपयोगिनीत्याह नाप्यसाविति ७९
सकृज्ज्ञानस्य बोधस्य स्थिरत्वाय निवृत्तिरपेक्ष्यत इत्याशंक्य न त्स्थिरत्वं बोधकाभावमपेक्षते नैसा धनांतरमित्याह

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अबाधादिति वाक्यप्रमाणजन्यज्ञानस्य बलवताप्रमाणेन बाधाभावादनुवृत्तिः स्यादेवातो न साधनांतरं तदर्थमनु
ष्ठेयमित्यर्थः ७७ ननु प्रमाणांतरेण बाधाभावेप्यविद्यया तत्कार्येण कर्तृत्वाद्यध्यासेन वा बाधः स्यादित्याशं

अबाधादनुवर्तेत बोधो नत्वन्यसाधनात् ७७ नाविद्यानापितत्कार्यं बोधं बाधितुमर्हति पुरैव तत्त्वबोधेन बा
धितेते उभे यतः ७८ बाधितं दृश्यतामक्षैस्तेन बाधो न शंक्यते जीवन्माखुर्न मार्जारं हंति हन्यात्कथं ७९

क्याह नाविद्येति तत्र हेतुमाह पुरैवेति ७८ नन्वविद्यायाः बाधितत्वेपि तत्कार्यस्य प्रतीयमानस्य बाधितत्वा
संभवात्तेन बोधस्य बाधो भवेदित्याशंक्योपादाननिवृत्त्यैव तस्यापि बाधितत्वं ॥ ॥ ॥ ॥

159

रम्निदीप० त्वाच्चनेनापि बाधः शंकितुं शक्यत इत्याह बाधितमिति तत्र दृष्टांतमाह जीवन्निति आरब्धमूषक: ७९
८० द्वैतदर्शनेन तत्वबोधस्य बाधाभावं कैमुतिकन्यायमदर्शनेन दृढयितुं तदनुकूलदृष्टांतमाह अपीति॥

अपि पाशुपतास्त्रेण विद्धश्चेन्न ममार यः निष्फलेषु विनुन्नांगो नंक्ष्यतीत्यत्र का प्रमा ८०

यः समर्थः पाशुपतास्त्रेण विद्धोपि न ममार चेत् किल स निःफलेषु विनुन्नांगः शल्यरहितेन इषुणा व्यथितदेहः ८०
स ननंक्ष्यति नाशं मा प्स्यतीत्यत्राकाम मानं नास्तीत्यर्थः ८० ॥श्रीरामायनमः॥ ॥श्री॥ ॥
प्रमाणं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दृष्टांतसिद्धमर्थं दार्ष्टांतिके योजयति आदाविति आदौ विद्याभ्याससमये चित्रैर्बहुविधैः स्वकार्यैः ममात्त्वकर्तृ त्वभोक्तृत्वादिभिर्जृंभमाणया विवर्धमानया विद्यया सह बोधो युध्वा युद्धं कृत्वा नाम जयत् सद्गुवाभ्यासपाटवेन

आदावविद्यया चित्रैः स्वकार्यैर्जृंभमाणया युध्वा बोधो जयत्सोऽद्य सुहृदो वा ध्यतां कथं ८१
तिष्ठंत्वज्ञानतत्कार्यशवा बोधेन मारिताः न भीतिर्बोधसंम्राजः कीर्तिः प्रत्युत तस्य तैः ८२

सुहृदो घेदानीमविद्यानिवर्तनोसस्तां निर्मूलेन तत्कार्येण ध्यासेन कथं वाध्यतां न कथमपि वाध्येते त्यर्थः ८१ उ
पपादितमर्थं श्रोतृबुध्यारोहाय रूपकेणाह तिष्ठंत्विति ८२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

न॰ सिद्दी॰ प॰ भवत्वेवं भक्तेरेव किमायातमित्यत आह यएवमिति यः पुमानेवमुक्तप्रकारेण अविद्यातत्कार्यघातकेनबोधे
८१ नश्वत्यात्मैकत्वज्ञानेन वियुज्यते न कदापि वियुक्तो भवति अस्य पुंसो देहादिनिष्ठया भवत्या वानिवृत्त्या वा

य एवमनिभृतेरेण बोधेन न वियुज्यते भवत्या वानिवृत्त्या वा देहादिगतया स्यात्किं ८३ भवत्वा वा
न हेन्यात्को वा धहीनस्य सर्वथा स्वर्गाय वाऽपवर्गाय यतितव्यं यतो नरैः ८४ ॥ भर॥ ॥

किं न किमपि इष्टमनिष्टं वेत्यर्थः ८३ तर्हि ज्ञानिवदज्ञानिनोऽपि भवत्वा वा । यहीनयुक्त इत्याशंक्याह भवत्वा वेति ८१
तत्रोपपत्तिमाह स्वर्गापवेति ८४

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

विदुष आगतो नयुक्त इत्यत्रोक्तं तर्हि कर्मिणां मध्ये वर्त्तमानेन तेन किं कर्त्तव्यमित्यत आह विद्वांश्चेदिति विद्वांस्ता
र्श्गं कर्मिणां मध्ये तिष्ठेश्चेत्तेन तदनुरोधतस्तेषामनुसारेण शरीरादिभिः सर्वाः क्रियाः करोत्वेव न त्वकर्मिणो निवा

विद्वांश्चेन्नादृशां मध्ये तिष्ठेत्तदनुरोधतः कायेन मनसा वाचा करोत्वेवाखिलाः क्रियाः ८५ एष
मध्ये बुभुत्सूनां यदा तिष्ठेत्तदा पुनः बोधायैषां क्रियाः सर्वा दूषयंस्त्यजतु स्वयं ८६

रयेदित्यर्थः ८५ अस्यैव तत्त्वबुभुत्सूनां मध्येऽवस्थितस्य कृत्यमाह एष इति एष विद्वान्बुभुत्सूनां मध्ये यदा ति
ष्ठेत्तदा एषां बुभुत्सूनां बोधाय तत्त्वज्ञानजननाय ताः क्रियाः दूषयन्स्वयमपि त्यजतु ८६ ॥श्री॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त्मदीप० कुत एवं कर्तव्यमित्यत आह॥ अविद्वदिति अज्ञानामनुसारेण ज्ञानिनो वर्तनमुचितं कृपालुत्वात्तेषामनुकंपना
८२ यत्वाच्चेति भावः एवं क्व दृष्टमित्यत आह स्तनंधयेति स्तनंधया स्तन्यपानक… नीरः शिशव इत्यर्थः ८७ पि

अविद्वदनुसारेण वृत्तिर्बुद्धस्य युज्यते स्तनंधयानुसारेण वर्तते तत्पिता यतः ८७ अधि
क्षिप्तस्ताडितो वापि बालेन स्वपिता तदा॥ न क्लिश्नाति न कुप्येच्च बालं प्रत्युत लालयेत् ८८
निंदितस्तूयमानो वा विद्वानज्ञैर्न निंदति न स्तौति किं तु तेषां स्याद्यथा बोधस्तथाचरेत् ८९

तु स्तनंधयानुसारित्वमेव दर्शयति अधिक्षिप्त इति ८० दार्ष्टान्तिके योजयति निंदित इति विद्वानज्ञैर्निंदित ८२
स्तूयमानो वा स्वयं न निंदति न स्तौति किं त्वेषामज्ञानिनां यथा बोध उपजायते तथाचरेत् ८९

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त्वमाचरणे निमित्तमाह येनायमिति अयमज्ञानी अत्रास्मिंल्लोके विदुषो येन यादृशेन नटनेन तत्त्वमवगच्छति त
थाचरणं तेन कर्त्तव्यमेव तर्हि तद्वदेव कार्यांतरमपि मन्येतेत्यत आह अज्ञसंबोधादिति यतस्तद्विदस्तत्त्व
विदोऽत्र लोकेऽज्ञसंबोधादन्यत्कर्त्तव्यं नैवास्ति अतस्तदनुसरणेन तत्त्वबोधनं कर्त्तव्यमित्यर्थः ९० वृत्तव

येनायं नटनेनात्र बुध्यते कार्यमेव तत् अज्ञसंबोधान्नैवान्यत्कार्यमस्त्यत्र तद्विदः ९० कृत
कृत्यतया तृप्तः प्राप्तप्राप्यतया पुनः तृप्यन्नेवं स्वमनसा मन्यतेऽसौ निरंतरं ९१ ॥श्री॥

र्तिष्यमाणयोस्तात्पर्यमाह कृतकृत्यतयेति असौ विद्वान्पूर्वोक्तप्रकारेण कृतकृत्यतया कृतं कृत्यं जातं येनासौ
कृतकृत्यस्तस्य भावस्तत्ता तया तृप्तः सन्पुनर्वक्ष्यमाणप्रकारेण प्राप्तप्राप्यतया प्राप्तं प्राप्यं येन स प्राप्तप्राप्यस्त म

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तृप्तिदी प० भावयन्त्तातयात्यन्ततृप्तो भवन्स्वमनसा निरंतरमेवं मन्यते ९१ किं मन्यत इत्याह धन्योहमित्यादिना धन्यः
९३ द्वितार्थः आदरार्था वीप्सा नित्यमनवरतं स्वात्मानं स्वस्य निजं रूपं देशाद्यनवच्छिन्नं प्रत्यगात्मानमंजसा सा

धन्योहं धन्योहं नित्यं स्वात्मानमंजसा वेद्मि॥ धन्योहं धन्योहं ब्रह्मानंदो विभाति मे स्पष्टं ९२

साघतो वेद्मि जानाम्यतो धन्य इत्यर्थः एवमात्मज्ञानलाभनिमित्तां तुष्टिमभिधाय तत्फललाभनिमित्तां तां ९३
दर्शयति धन्योहमिति ब्रह्मानंदः ब्रह्मभूतानंदः मे स्पष्टं भाति स्पष्टं यथा भवति तथा स्फुरतीत्यर्थः ९२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

एवमिष्टप्राप्त्यानुष्टिमभिधायअनिष्टनिवृत्त्यापितुष्यतीत्याह धन्योहमिति अथेदानींदुःखंदुःखरूपसंसारंनवा
क्ष्येन परप्राप्ततःकृतार्थइत्यर्थः दुःखाप्रतीतौकारणमाह धन्योहमिति अनेकवासनाजात्मत्तानंक्वापिप

धन्योहंधन्योहंदुःखंसांसारिकंनवीक्षेय धन्योहंधन्योहंस्वस्याज्ञानंपलायितं
किं क्वापि ९३ धन्योहंधन्योहंकर्त्तव्यंमेनविद्यतेकिंचित् धन्योहंधन्योहंप्राप्तव्यंस
र्वमधसंपन्नं ९४ धन्योहंधन्योहंतृप्तेर्मेकोपमाभवेल्लोके॥ ॥

लायितंनष्टमित्यर्थ ९३ अज्ञाननिवृत्तिफलंकृतकृत्यत्वंप्राप्तिप्राप्यत्वंचदर्शयति धन्योहमिति ९४ इदानीं
कृतकृत्यत्वमित्यादिनाजातायाःतृप्तेर्निरतिशयत्वमाह धन्योहमिति अतःपरंकर्त्तव्याद्दर्शना॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रत्निदीप० जुष्टिरेवपरिस्फुरतीति धन्योहमिति ९५ अस्यसर्वस्यकारणभूतं पुण्यपुंजपरिपाकमनुस्मृत्यतुष्यतीत्सा
२४ ह अहोपुण्यमिति एवंविधपुण्यसंपादकमात्मानं अनुस्मृत्यतुष्यति अस्मेति ९६ इदानीं सम्यक्ज्ञानसा

पुनः धन्योहं धन्योहं धन्योधन्यः पुनर्धन्य ९५ अहोपुण्यमहोपुण्यंफलितं
फलितं दृढं अस्यपुण्यस्यसंपन्नेरहोवयमहोवयं ९६ अहोशास्त्रमहो
शास्त्रमहोगुरुरहोगुरुः अहोज्ञानमहोज्ञानमहोसुखमहोसुखं २९७

धनं शास्त्रं तदुपदेष्टारं माचार्यं च अनुस्मृत्यतुष्यति अहोशास्त्रमिति पुनश्च शास्त्रजन्यंज्ञानं तज्जन्यंसुखं २४
चानुस्मृत्यतुष्यति अहोज्ञानमिति २९७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ग्रंथाभ्यासफलमाह तृप्तिदीपमिति येबुधाः इमं तृप्तिदीपं नित्यं अनुसंदधते अनुसंधानं कुर्वते ते ब्रह्मानंदे निमज्जंतः निमग्नाः संतः निरंतरं तृप्यंति तृप्ता भवंति २९८ इति श्रीमत्परमहंसपरिव्राजकाचार्यश्री

तृप्तिदीपमिमं नित्यं येनुसंदधते बुधाः ब्रह्मानंदे निमज्जंतस्ते तृप्यंति निरंतरं २९८
इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीविद्यारण्यकृतस्तृप्तिदीपः समाप्तः ॥ ॥

भारतीतीर्थविद्यारण्यमुनिवर्यकिंकरेण रामकृष्णाख्यविदुषा विरचिता तृप्तिदीपव्याख्या समाप्ता ॥ ॥ २५

KKSU LIBRARY RAMTEK 441 106 Dist. Nagpur M-1431

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection